Srirangam Sri Sankaraguruhula Series No. 10.

॥ श्रीः ॥

॥ जीवन्मुक्तिकल्याणम् ॥

नल्लाध्वरिविरचितम्

JĪVANMUKTIKALYĀNAM

A DRAMA BY NALLĀDHVARI

EDITED BY

Gurubhaktasikhamani, Sastraprasarabhushana

Sri T. K. BALASUBRAHMANYA AIYAR B. A.

SRIRANGAM

SRI VANI VILAS PRESS.

1944

Price Rs. 1-4-0] [Postage Extra.

PREFACE.

Jivanmuktikalyana nataka is an allegorical drama by Sri Nalladhvari after the model of *Prabodhachandrodaya*, *Sankalpasuryodaya* etc. This drama is full of Santirasa dealing with the marriage of Jivanmukti with King Jiva Several, sublime Vedantic truths such as the nature of pratyagatma, hidden in the Vedanta texts and difficult to understand even by those who always revel in the shastras are easily revealed in this drama in a very dexterous manner and in easy simple style. The hero of the drama King Jiva with his consort Buddhi, after constantly roaming with her in the waking, dreaming and sleeping states, becomes disgusted and desires to attain the Jivanmukti sukha. He is obstructed in this desire by the six enemies viz., Kama, Krodha, Lobha, Moha, Mada and Matsarya whom he finally subdues with the help of the eight Atmagunas such as Daya, Kshanti, Anasuya, Anayasa, Saucha, Mangala, Akarpanya and Aspriha. He then enters the fourth asrama and endowed with Sadhanachatushtava and helped by sravana etc., obtains Brahmasakshatkara by the grace of Sivaprasada and Desikanugraha, becomes Brahma and enjoys the pleasures of Jivanmukti. Such is the argument of the play The plot is developed with great skill and abstruse philosophic truths are expounded in very simple and easily understandable style

The author studied under one Ramanatha Dikshita a contemporary of Sri Ramabhadra Dikshita who flourished in the court of Sri Sahaji Maharaja of Tanjore. Even before he was twenty years of age he had composed *Sringarasarvasva Bhana* and *Subhadraparinaya Nataka.* In his later age he studied Vedanta under Sri Paramasivendra and Sri Sadasivendra and after carefully observing the nature of Jivanmuktas in the course of his association with Sri Sadasiva Brahmendra, he composed the two dramas *Chittavrittikalyana* and *Jivanmuktikalyana* as also the Vedanta Prakarana *Advaitarasamanjari* with his own commentary He appears to be a devotee of Ganesa as is evident from his introductory stanzas in all his works In the end of Advaitamanjari he himself says 'समाप्यवस्थाविभूतश्रीविघ्नेशनिदेशतः' We do not dilate on the various merits of this drama but leave them to our readers to judge for themselves It gives us great pleasure to be able to publish this hitherto unpublished drama for the first time and we hope to publish later on his other hitherto unpublished works also.

T. K. Balasubrahmanyam.

भूमिका



विदितमेवेदं विश्वेषामपि वैदिकपथाभ्यस्तानां भारतीयानाम्, यन्निखलपुमर्थशिरोमणिभूतनिःश्रेयससाधनस्य आत्मज्ञानस्य प्रकाशनायैव धर्मकारुणिकेन भगवता परमेश्वरेण प्रावर्तिषत सर्वेऽपि वेदा इति। कालक्रमेण च निखिलमपि वेदमवबोद्धुमपारयत्सु पुरुषेष्वनुकम्पया महात्मभिरुदतीर्णैरालोक्य नैकावेधानधिकारिविभेदान्, अपरोक्षीकृत्य योगमहिम्ना समस्तमपि मन्त्रजातम्, संप्रणीतानि भिन्नभिन्नया सरण्या तदीयार्थविवरणपराणि स्मृतीतिहासपुराणादिग्रन्थरत्नानि। तेभ्योऽपि वैदिके वर्त्मनि मानवानां स्वारसिकाप्रवृत्तिमभिवीक्ष्य महाकवयः स्वत एव तत्र प्रवृत्त्यान्मुख्यसंपादकानि व्यङ्ग्यप्रधानानि महाकाव्यानि व्यरीरचन्। तानि सर्वाण्यपि प्रायेण वैदिकमार्गावलम्बीन्येव, अथापि पूर्वकाण्डप्रतिपादितसामान्यधर्मविशेषधर्मप्रवृत्तिफलकानि शृङ्गारादिरसप्रधानान्येव भूयसा दृश्यन्ते। तेष्वपि क्वचित्क्वचित् श्रोतॄणां वैराग्योत्पादकाः संदर्भविशेषा विद्यन्ते, अथापि सामस्त्येनोपनिषदर्थप्रकाशकानि शान्तिरसप्रधानानि काव्यानि नितरां विरलतमान्येव। तत्र चेदंप्रथमतया प्रवृत्तं श्रीकृष्णमिश्रयतिप्रणीतं प्रबोधचन्द्रोदयं नाम नाटकरत्नम्; यन्मार्गमवलम्ब्य संकल्पसूर्योदयप्रभृतीनि नाटकानि प्रवृत्तानि। तेष्वेवान्यतममिदमौपनिषदार्थाभिप्रदर्शकमद्वैतसिद्धान्तमर्मोद्घाटकं रसिकहृदयसमास्वादनीयरसमाधुरीसमुद्भावितं जीवन्मुक्तिकल्याणं नाम नाटकम्। यस्य च कर्ता कौशिकगोत्रोत्पन्नश्छन्दोगश्चोलेषु कुम्भघोणनगरपरिसरवर्तिकण्डरमाणिक्याग्रहारभिजनो बालचन्द्रदीक्षिततनूजो नल्लाकविरिति श्रूयते। नाटके चास्मिन्नाम्नायान्तर्निगूढं शश्वच्छास्त्राणि परिशीलयद्भिरपि सुतरां दुरवगाहं प्रत्यगात्मस्वरूपमनितरसाधारणेन विषयविवेचनचातुरीचमत्कारेण सम्यगभिप्रकाशितम्। अत्र च कथानायको जीवराजः स्वतादात्म्यमापन्नया सहचारिण्या बुद्ध्या सार्धं जाग्रदाद्यवस्थासु पुनः पुनश्चरित्वा नितरां निर्विण्णो जीवन्मुक्तिसुखमभिप्रेप्सुस्तदन्तरायकारिणः कामादीनरिषड्वर्गान्निर्जित्य दयादिभिरात्मगुणाष्टकैः, परिश्रय च तुरीयमाश्रमम्, साधनचतुष्टयसंपन्नः श्रवणादिभिः शिवप्रसाददेशिकानुग्रहाभ्यां च ब्रह्मसाक्षात्कारं संप्राप्य ब्रह्मभावमापन्नो जीवन्मुक्तिसुखमनुभवतीत्येवमेतन्नाटककथासंग्रहः॥

अत्र च केषांचन जीवन्मुक्तौ विप्रतिपत्तेर्दर्शनान्किञ्चिदिव विचिन्त्यते । मुक्तिस्तावद्द्वेधाम्ते द्विप्रकारा निरूपिता—जीवन्मुक्तिः, विदेहमुक्तिश्चेति । ब्रह्मसाक्षात्कारेणाविद्यापगमे सति सर्वाण्यपि कर्माणि प्रारब्धकर्मातिरिक्तानि स्वयमेव निवर्तन्ते । प्रारब्धमेकं तु तत्फलानुभवावसान एव विनश्यति । यथा वा इषुकारेण विसृष्टः शरो निष्पन्नेऽपि लक्ष्यवेधात्मके फले न तावता भूमौ पतति, अपि तु यावद्वेगं गत्वैव, एवमेव फलं प्रदातुमारब्धं कर्मापि न मध्ये निवर्तते । अतः प्रारब्धकर्मफलानुभवो ज्ञानिनामप्यवश्यमङ्गीकार्यः । एतदेव श्रुतिरुपदिशति—'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छा. ६) इति । 'तस्यास्य एवमाचार्यवतो मुक्तविद्याभिनद्धस्य तावदेव तावानेव कालः चिरं क्षेपः, सदात्मस्वरूपसंपत्तेरिति वाक्यशेषः । कियान् कालश्चिरमिति, उच्यते—यावन्न विमोक्ष्ये न विमोक्ष्यते इत्येतत्पुरुषव्यत्ययेन, सामर्थ्यात्; येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयात् देहपातो यावदित्यर्थः । अथ तदैव सत् संपत्स्ये संपत्स्यते इति पूर्ववत्' इति व्याख्याता श्रुतिर्भगवत्पादैः । लोके सर्वस्याप्यविद्याकार्यत्वात्कारणमन्तरेण कार्यस्य स्थित्ययोगाच्च प्रारब्धकर्मापि स्वयं फलदानाय स्वकारणीभूताविद्यालेशद्वारा देहेन्द्रियादिकमप्यवस्थापयतीति न सर्वात्मनाऽविद्यानिवृत्तिर्विदुषामपि । ते च यावत्प्रारब्धं जीवन्मुक्ता इति व्यपदिश्यन्ते । प्रारब्धावसाने तु तदीयशरीरस्य स्वस्वकारणीभूतपृथिव्यादिपञ्चभूतेषु लयेन विदेहमुक्ता भवन्ति । एतादृश-जीवन्मुक्तेः स्वरूपम्, तत्प्रमाणसाधनफलानि च जीवन्मुक्तिविवेकाख्ये प्रकरणे श्रीविद्यारण्यस्वामि-भिर्विस्तरतः प्रतिपादितानि । तत्र 'तस्य तावदेव चिरम्', 'विमुक्तश्च विमुच्यते', 'अत्र ब्रह्म समश्नुते' इत्याद्याः श्रुतयः जीवन्मुक्तिमुपदिशन्ति । स्मृतिषु चायमेव वासिष्ठे जीवन्मुक्त इति, महा-भारते ब्राह्मण इति, श्रीभगवद्गीतायां स्थितप्रज्ञः, भगवद्भक्तः, गुणातीत इति, सूतसंहितायामति-वर्णाश्रमी इति च नामभिर्व्यवह्रियते । अपि च शारीरकमीमांसायां तुरीयाध्याये प्रथमचरणे 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' इति सूत्रेण विदुषामप्यनारब्धकार्याणामेव कर्मणां विनाशा-नुवर्णनाद्भाष्यासाचार्याणामप्यभिमतैव जीवन्मुक्तिः ॥

तदेवमनेकप्रमाणसिद्धामपि जीवन्मुक्तिं केचन नाङ्गीकुर्वन्ति । तेषामयमाशयः— 'जीव-न्मुक्तिप्रतिपादकं शास्त्रं सर्वमप्यर्थवादमात्रम् । श्रोतव्यादिविधिभिर्विधीयमानं श्रवणादिकमतिप्रश-स्तम्, यस्यानुष्ठानाज्जीवतोऽपि मुक्तिर्लभ्यत इति श्रवणादिस्तावकमेव तत् । तथा च ज्ञानेन निरवशेषस्यैवाज्ञानस्य निवृत्तिः, न तु तल्लेशस्य तत्संस्कारस्य वाऽनुवृत्तिः । कर्मणा च सर्वेषामपि विद्यया विनाश एव । एव चाविद्याकर्मणोरभावाज्ज्ञानिनां शरीरेन्द्रियादिव्यवहारो नोपपद्यते । गीतायामपि भगवान 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति सर्वकर्मनिवृत्तिमेव प्रतिपाद-यति । कथं वा वह्निना दह्यमाने महति तूलराशौ अदग्धं किंचित्परिशिष्येत' इति । एतच्च भगवत्पा-दसिद्धान्तविरोधादुपेक्ष्यम् । तथा च 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' इत्यधिकरणे भाष्य-कारीयं वचनम्— 'अपि च नैवात्र विवदितव्यं ब्रह्मविदा कंचित्कालं शरीरं प्रियते न वा प्रियते इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण प्रतिक्षेप्तुं शक्येत ? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरूप्यते । तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयो-र्विद्यासामर्थ्यात्क्षय इति निर्णयः' इति । एतच्च रामानन्दस्वामिभिरित्थमवतारितम्— 'शिष्याच्

प्रति जीवन्मुक्तौ स्वानुभवमाह— अपि च नैवेति' इति। आमत्यां च 'तदेवं मध्यस्थान् प्रतिपाद्य ये भाष्यकारमात्रं मन्यन्ते तान् प्रत्याह' इत्युक्तम्। जीवन्मुक्तिशास्त्रस्यार्थवादताकल्पनमभ्युपगम्यते, अथापि 'वज्रहस्तः पुरन्दरः' इत्यादीनामिवैषामप्यविरोधात्स्वार्थे तात्पर्यमस्त्येव। तथा च जीवन्मुक्तिशास्त्रावद्वदनुभवानुरोधेन प्रारब्धकर्मणां ज्ञाननिवर्त्यत्वकल्पनं युक्तमेव। इषुकारदृष्टान्तश्च पुरस्तात्प्रपञ्चितः। एवंविधप्रारब्धकर्मप्रतिबन्धवशादेव विद्या सर्वांशेन नाविद्यां निवर्तयतीत्यविद्यालेशानुवृत्तिरप्युपपन्ना। गीतायामपि सर्वकर्माणि इत्यस्य प्रारब्धव्यतिरिक्तानीत्यर्थं संकोचः कार्यः। रज्जौ सर्पभ्रमेण भयकम्पादिकमनुभवतो मानवस्य रज्जुतत्त्वज्ञानेन निवृत्तेऽपि सर्पाध्यासे तत्संस्कारवशात्कंचित्कालं तदनुवृत्तिर्दृश्यते, तद्वद्ब्रह्मज्ञानेन निवृत्तेऽप्यज्ञाने तत्संस्कारवशाल्लौकिकव्यवहारो ज्ञानिनामप्युपपद्यते। पञ्चदशप्रकरणे च सप्रपञ्चं समर्थितमेतच्छ्रीविद्यारण्यमुनीश्वरैः। जीवन्मुक्तिपदमाभिप्रपन्नैः श्रीसदाशिवब्रह्मेन्द्रैरपि आत्मविद्याविलासे स्वानुभवः सम्यगाभप्रकाशितः। तदेवं बहुप्रमाणवशाद्विदुषामनुभवाच्च प्रारब्धव्यतिरिक्तानामेव कर्मणां ज्ञाननाश्यतया यावत्प्रारब्धं ज्ञानिनामपि देहस्थितिरिति जीवतोऽपि मुक्तिः सिद्धा भवति॥

एतादृशजीवन्मुक्तिपदप्रापकानि यानि साधनानि श्रुत्यादिषूपदिष्टानि, तेषामेव श्रवणादीनां तत्प्रतिरोधकाना कामादीनां च नाटकपात्रतां प्रकल्प्यैतन्नाटकप्रणयनेन द्रष्टॄणां स्वत एव साधनेषु प्रवृत्तिर्भूयादिति कवेराशय ऊह्यते। यद्यपि तीव्रमुमुक्षावतां विरागतासंपन्नानां महात्मना काव्यनाटकादौ प्रवृत्तिर्न संभवति, अथापि विचित्रप्रज्ञत्वात्पुरुषस्य पुराणश्रवणेनाप्यनधिगततत्त्वानां बेदानधिकारिणां तीव्रावरक्तमतां पुरुषाणामनुग्रहायैवैतादृशनाटकप्रणयने प्रवृत्तिः कवयितृणाम्। इममेवाभिप्रायं मनसि निधाय कैश्चिदुक्तम्— 'वेदाधिकारविधुरान् विदुषो विलोक्य व्रात्यादिकान् विदितनाटककाव्यसारान्। तद्बुद्धिवृत्त्यनुगुणं कृपया करोति ब्रह्मोपदेशमपि नाटकरूपमेव॥' इति॥

नाटकं चास्मिन्नतिलालितपदविन्यासातिशयः, नितरां सरलतमया सहृदयहृदयंगमया शैल्या अतिमात्रगहनशास्त्रीयप्रक्रियाविष्करणम्, तत्तत्पात्रानुरूपो व्यवहारः, विनोदभाषणेनापि तत्त्वप्रदर्शनं इत्यादीन्यावर्जयन्ति सचेतसां चेतांसि। शब्दानुशासे च स्वकीयं पाटवं सम्यगनुप्रकाशितं शिवस्तुतौ॥

कविश्चायं सर्वतोमुखप्रमुखनैकमखयाजिनः, तज्ज्ञानगरीशस्य शहजिमहाराजस्य सदस्यात् श्रीमतो रामभद्रदीक्षितस्य समकालिकाद्रामनाथदीक्षिताद्वाल्य एवाधीतसर्वविद्यः ऊनविंशतय एव शृङ्गारसर्वस्वभाणं सुभद्रापरिणयनाटकं च प्राणैषीत्। तथा च तेनैवोक्तम्— 'प्रागेव विंशद्वयसः प्रबन्धा नल्लाकवीन्द्रेण सुधीश्वरेण। शृङ्गारसर्वस्वमिति प्रतीतः संदर्भितोऽयं सरसः प्रबन्धः॥' इति। अन्ते च परमशिवेन्द्रश्रीसदाशिवेन्द्रयोः सकाशाद्गृहीत्वा वेदान्तशास्त्रम्, संप्रेक्ष्य च श्रीसदाशिवब्रह्मेन्द्राणां जीवन्मुक्तचर्याम्, चित्तवृत्तिकल्याणजीवन्मुक्तिकल्याणाभिधाने द्वे नाटके, अद्वैतरसमञ्जर्याख्यमेकं वेदान्तप्रकरणम्, तद्वयाख्यानं च विरचयामास। अस्य च कृतिषु तत्र तत्र परस्परं श्लोकसारूप्यमपि दरीदृश्यते। तथा हि—एतन्नाटकस्थाः (अङ्क. ४. श्लो. २६, अङ्क. ५.

श्लो. १८, १९, २६, २८, २९, ३०. ३१, ३२) नव श्लोकाः अद्वैतरसमञ्जर्यां तथैव दृश्यन्ते ; 'स्पर्शेन ते परमसुन्दरि' (अङ्क. ५. ५५. इत्यय श्लोकः भाणेऽपि समुपलभ्यते। परं तु उत्तरार्धं परं तत्रान्यथा दृश्यते। 'यस्या दर्शनमेव (अङ्क. २. २१) इत्येतत्पद्यसमानार्थकं पद्य भाणे विद्यते। तृतीयेऽङ्के २५, २६ तमौ श्लोकावुभयत्र समानाक्षरौ संदृश्येते। कविश्चायं गणेशोपासक इति प्रतीयते। निखिलास्वपि कृतिषु आदौ विनायकस्तुतिर्वर्तते। भाणे तु कस्यचन मत्तगजस्य प्रवेशं परिकल्प्य नाटकपात्रमुखेन स्वाभिलषितमाविष्करोति। यथा— "नायं मदान्धो मत्तद्विपः ; किं तु प्रथमसमाराधनाकरणपरिकुपितस्य भगवतः करिवदनस्य प्रादुर्भाव एव। तदेनं स्तुत्या सान्त्वयिष्यामि तावत्। 'अञ्जलिरयं जनानामातङ्कच्छेदाविरुदाय। वरदाय दिव्यगन्धद्विरदाय ध्वस्तसर्वदुरिताय ॥ जय जय जगतां मूल जय जय भो जन्मकलमषद्वेषिन्। गजवक्त्र विघ्नशत्रो सुत्रामस्तुतचरित्र शिवपुत्र ॥' कथमेष स्तुतमात्र एव प्रसन्न इव परावर्तते।" इति। किं च, गणाधिपानुग्रहेणैव समवाप्तं काव्यनिर्माणनैपुण्यमिति स्वयमेव ब्रवीति—'असौ तत्र श्रीमानमृतरसधारासहचरीं गिरां देवीं बिभ्रद्वजमुखकृपातः परिणताम्' इति, 'मम श्रीमल्लम्बोदरदरकृपापाङ्गतगिरः प्रबन्धेऽस्मिन्नेतः कुतुकमनुबध्नाति तदपि' इति च। अद्वैतरसमञ्जर्या अवसाने च 'समाप्यवस्थाविभूबश्रीविघ्नेशनिदेशतः' इति कथयति ॥

तदेवमनन्तजन्मसुकृतपरिपाकवशाद्बाल्य एव सर्वतो विरक्तानां ब्रह्मदर्शनेन ब्रह्मभावमापन्नानां स्थितप्रज्ञादिलक्षणलक्षितानां योगमार्गेऽपि निरङ्कुशप्रवृत्तिमतां ब्रह्मसूत्रवृत्त्यादिबहुग्रन्थप्रणेतृणां जीवन्मुक्तानां श्रीसदाशिवब्रह्मेन्द्राणां शिष्यभावमापन्नैः सत्कविवृन्दप्रशंसापात्रभूतैः श्रीनल्लादीक्षितैर्विरचितमिदं नाटकं प्रकाशीकृतवतामेतादृशासंख्यग्रन्थप्रकाशनबद्धदीक्षाणां 'गुरुभक्तशिखामणिः' 'शास्त्रप्रमाणभूषणम्' इत्यादिविरुदावभूषितानां ब्रह्मश्री. टि. के. बालसुब्रह्मण्यार्याणां प्रवृत्तिमेतां सफलीकुर्वन्तु सर्वेऽप्यमरभारतीप्रणयिन इति शम् ॥

श्रीशंकरगुरुकुलम्
श्रीरङ्गम्.

के. एम्. वेङ्कटरामशास्त्री
श्रीसच्चिदानन्दभारतीभाण्डाराध्यक्षः ॥



॥ श्रीः ॥

॥ जीवन्मुक्तिकल्याणम् ॥

॥ नल्लाध्वरिविरचितम् ॥



प्रथमोऽङ्कः ।

भद्राकारपरिग्रहोचितमदारम्भप्रियंभावुकाः
स्वीकुर्वञ्शुभवासनाः कतिचिदप्याज्ञापरिष्कारिणीः ।
श्रुत्यन्ताभ्यसनैरलिव्यतिकरादात्मानमुन्मोचय-
न्स श्रीमान्कृपया महागणपतिः पुष्णातु निःश्रेयसम् ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—

तादात्म्येन निरन्तरालमिलितां गौरीं विहारेच्छया
विस्मृत्याथ तया वियोजित इतस्तन्वंस्तदन्वेषणम् ।
सेनान्या भगवन्भवान्यपि भवानेवेत्यनूद्बोधित-
स्तल्लाभादि[नि]र्वृतो दिशतु वः श्रेयोऽर्धनारीश्वरः ॥ २ ॥

(इति पुष्पाञ्जलिं विकीर्य, नेपथ्याभिमुखमवलोक्य,) आर्ये, इतस्तावत् ।

(प्रविश्य)

नटी— अज्ज, इअम्हि । [आर्य, इयमस्मि ।]

सूत्रधारः— आर्ये, अद्य खलु भगवतो मध्यार्जुनप्रभोर्यात्राप्रत्युपस्थितैः शमदमप्रधानैर्ब्रह्मनिष्ठै-
रादिष्टोऽस्मि सामाजिकैरध्यात्मकथानुबन्धबन्धुरं किमप्यपूर्वं नाटकं नाटयितव्यमिति । तदनु-
चिन्त्यतां त्वया तथाविधं नाटकम् ।

नटी— अज्ज, किं वि मे ण पडिहाइ । [आर्य, किमपि मे न प्रतिभाति ।]

सूत्रधारः— अयि विस्मरणशीले, त्वमजैवासि प्रकृत्या ।

नटी— (सक्रोधम्) जइ एव्वं तदो अज्जस्स अणुरूवा भविस्सं । [यद्येवं तत आर्यस्यानुरूपा भविष्यामि ।]

सूत्रधारः— (सक्रोधावेगम्) मुग्धे, प्रकृत्याऽहमपि यद्यजः स्यां तर्हि तदनुरूप आचारः पक्षे त्वत्परित्यागरूप एव पर्यवस्येदिति महदनिष्टमापद्येत । तथा खल्वजानामाचारो दृश्यते ।

एकामजां लोहितशुक्लकृष्णां बह्वीः प्रजाः स्वानुरूपाः सृजन्तीम् ।
एको ह्यजस्तामनुशेत एनां जहाति चैनामपरोऽनुशुक्ताम् ॥ ३ ॥

नटी— भुत्तभोअं मं उज्झिअ अण्णाए कए वि कण्णाए संगदुअ णिव्वुदो होदु अज्जो । [भुक्तभोगां मामुज्झित्वाऽन्यया कयाऽपि कन्यया संगत्य निर्वृतो भवत्वार्यः ।]

(इति साटोपं परावर्तते ।)

सूत्रधारः— (सानुनयं हस्ते गृहीत्वा) अयि सदसद्विलक्षणे, वाचारम्भणमात्र एव प्रपञ्चो न परमार्थः । तदेहि, मा निवर्तस्व । नर्तितव्यं नाम त्वया यावत्प्रतिभासं प्रारब्धानुसारेण । ततस्तु परं स्वत एव परावर्तिष्यसे ।

नटी— (सप्रसादौन्मुख्यम्) अज्ज, मए किं णच्चिदव्वं ? [आर्य, मया किं नर्तितव्यम् ?]

सूत्रधारः— जीवन्मुक्तिकल्याणं नाम नाटकम्, यस्य कविः सुभद्रापरिणयशृङ्गारसर्वस्वचित्रवृत्तिकल्याणाद्वैतरसमञ्जर्याद्यनेकप्रबन्धनिबन्धनाभिनन्दनीयः श्रीबालचन्द्रसूर्येन्द्रनन्दनो नल्लाध्वरी ।

नटी— अज्ज, सुमराविदम्हि । विसुमरणकिदो उण मए अवराहो मरिसिदव्वो । [आर्य, स्मारिताऽस्मि । विस्मरणकृतः पुनर्ममापराधो मर्षितव्यः ।]

सूत्रधारः— अस्तु नामेदम् । प्रस्तूयतां संगीतकम् । संप्रति हि,

शारदानुग्रहवशाद्विशदीकृतमानसाः ।
हंसाभ्युदयशंसिन्यो वासराणां विभूतयः ॥ ४ ॥

नटी—

दाणिं पडिप्पहादं सुज्जालेअप्फुडीकिदप्पासिरी ।
ण खु सा राजीवतदी खमदि भमरलक्खणप्पपरिहूदिं ॥ ५ ॥

प्रथमोऽङ्कः ।

[इदानीं प्रतिप्रभातं सूर्यालोकस्फुटीकृतात्मश्रीः ।
न खलु सा राजीवततिः क्षमते भ्रमरलक्षणात्मपरिभूतिम् ॥]

सूत्रधारः—

कविरतिमनोज्ञसूक्तिः कथा जगत्पावनी वयं कृतिनः ।
परिषदियं गुणनिष्ठा भव्यस्य विधेः प्रसादविभवोऽयम् ॥ ६ ॥

(निपथ्ये)

अये भरतकुलशेखर, विधिप्रसादविभव इति मां निर्दिशञ्श्लाघनीयोऽसि ।

चोदनात्मा विधिस्तस्य प्रसादो जनको मम ।
विधिप्रसादविभवस्तस्मादहमुदाहृतः ॥ ७ ॥

सूत्रधारः— (स्मृतिमभिनीय) कथमेष प्रविष्ट एव भावो जीवामात्यस्य रमणीयचरणस्य भूमिकामादाय रङ्गमण्डपम् । आर्ये, तदावामप्यनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ ।)

॥ प्रस्तावना ॥

(ततः प्रविशति रमणीयचरणः ।)

रमणीयचरणः—

विधिगोचरकर्मनिर्मितत्वाद्विमलोऽहं सकलाभिलाषपात्रम् ।
उपजीव्यतया ततः परेषां प्रथितः प्राथमिकः स्वयं समर्थः ॥ ८ ॥

अपि च,

स्वर्गादिनश्वरफलानभिसंधिबन्धनिर्व्यूढया भगवदर्थतयाऽन्वितो यः ।
तस्मान्निसर्गमहतः शुभकर्मराशेर्जातस्य मे किमितरेण गुणोत्तरेण ॥ ९ ॥

किं च,

अनेनैवानुभावेन मया लब्धा महोन्नता ।
सत्त्वशुद्धिरिति ख्याता कन्या कल्मषहारिणी ॥ १० ॥

(प्रविश्य)

सत्त्वशुद्धिः— आणवेदु अज्जो जं मए अणुचिट्ठिअदु । [आज्ञापयत्वार्यो यन्मयाऽनुष्ठीयताम् ।]

नटी— अज्ज, किं वि मे ण पडिहाइ । [आर्य, किमपि मे न प्रतिभाति ।]

सूत्रधारः— अयि विस्मरणशीले, त्वमजैवासि प्रकृत्या ।

नटी— (सक्रोधम्) जइ एव्वं तदो अज्जस्स अणुरूवा भविस्सं । [यद्येवं तत आर्यस्यानुरूपा भविष्यामि ।]

सूत्रधारः— (सक्रोधावेगम्) मुग्धे, प्रकृत्याऽहमपि यद्यजः स्यां तर्हि तदनुरूप आचारः पक्षे त्वत्परित्यागरूप एव पर्यवस्येदिति महदनिष्टमापद्येत । तथा खल्वजानामाचारो दृश्यते ।

एकामजां लोहितशुक्लकृष्णां बह्वीः प्रजाः स्वानुरूपाः सृजन्तीम् ।
एको ह्यजस्तामनुशेत एनां जहाति चैनामपरोऽनुशुक्ताम् ॥ ३ ॥

नटी— भुत्तभोअं मं उज्झिअ अण्णाए कए वि कण्णाए संगदुअ णिव्वुदो होदु अज्जो । [भुक्तभोगां मामुज्झित्वाऽन्यया कयाऽपि कन्यया संगत्य निर्वृतो भवत्वार्यः ।]

(इति साटोपं परावर्तते ।)

सूत्रधारः— (सानुनयं हस्ते गृहीत्वा) अयि सदसद्विलक्षणे, वाचारम्भणमात्र एव प्रपञ्चो न परमार्थः । तदेहि, मा निवर्तस्व । नर्तितव्यं नाम त्वया यावत्प्रतिभासं प्रारब्धानुसारेण । ततस्तु परं स्वत एव परावर्तिष्यसे ।

नटी— (सप्रसादौन्मुख्यम्) अज्ज, मए किं णच्चिदव्वं ? [आर्य, मया किं नर्तितव्यम् ?]

सूत्रधारः— जीवन्मुक्तिकल्याणं नाम नाटकम्, यस्य कविः सुभद्रापरिणयशृङ्गारसर्वस्वचित्रवृत्तिकल्याणाद्वैतरसमञ्जर्याद्यनेकप्रबन्धनिबन्धनाभिनन्दनीयः श्रीबालचन्द्रसूरीन्द्रनन्दनो नल्लाध्वरी ।

नटी— अज्ज, सुमराविदम्हि । विसुमरणाकिदो उण मह अवराहो मरिसिदव्वो । [आर्य, स्मारिताऽस्मि । विस्मरणकृतः पुनर्ममापराधो मर्षितव्यः ।]

सूत्रधारः— अस्तु नामेदम् । प्रस्तूयतां संगीतकम् । संप्रति हि,

शारदानुग्रहवशाद्विशदीकृतमानसाः ।
हंसाभ्युदयशंसिन्यो वासराणां विभूतयः ॥ ४ ॥

नटी—

दाणिं पडिप्पहादं सुज्जालोअप्फुडीकिदप्पसिरी ।
ण खु सा राजीवतदी खमदि भमरलक्खणप्पपरिहूदिं ॥ ५ ॥

[इदानीं प्रतिप्रभातं सूर्यालोकस्फुटीकृतात्मश्रीः ।
न खलु सा राजीवततिः क्षमते अवरलक्षणात्मपरिभूतिम् ॥]

सूत्रधारः—

कविरतिमनोज्ञसूक्तिः कथा जगत्पावनी वयं कृतिनः ।
परिषादियं गुणनिष्ठा भव्यस्य विधेः प्रसादविभवोऽयम् ॥ ६ ॥

(नेपथ्ये)

अये भरतकुलशेखर, विधिप्रसादविभव इति मां निर्दिशन्श्लाघनीयोऽसि ।

चोदनात्मा विधिस्तस्य प्रसादो जनको मम ।
विधिप्रसादविभवस्तस्मादहमुदाहृतः ॥ ७ ॥

सूत्रधारः— (स्मृतिमभिनीय) कथमेष प्रविष्ट एव भावो जीवामात्यस्य रमणीयचरणस्य भूमिकामादाय रङ्गमण्डपम् । आर्ये, तदावामप्यनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ ।)

॥ प्रस्तावना ॥

(ततः प्रविशति रमणीयचरणः ।)

रमणीयचरणः—

विधिगोचरकर्मानिर्मितत्वाद्विमलोऽहं सकलाभिलाषपात्रम् ।
उपजीव्यतया ततः परेषां प्रथितः प्राथमिकः स्वयं समर्थः ॥ ८ ॥

अपि च,

स्वर्गादिनश्वरफलानभिसंधिबन्धनिर्व्यूढया भगवदर्थतयाऽन्वितो यः ।
तस्माच्चिसर्गमहतः शुभकर्मराशेर्जातस्य मे किमितरेण गुणोत्तरेण ॥ ९ ॥

किं च,

अनेनैवानुभावेन मया लब्धा महोन्नता ।
सत्त्वशुद्धिरिति ख्याता कन्या कल्मषहारिणी ॥ १० ॥

(प्रविश्य)

सत्त्वशुद्धिः— आणवेदु अज्जो जं मए अणुचिट्ठिअदु । [आज्ञापयत्वार्यो यन्मयाऽनुष्ठीयताम् ।]

रमणीयचरणः— वत्से, किमन्यत् ? देवस्य त्वया साहायकमाचरितव्यम् ।

सत्त्वशुद्धिः— को सो देवो ? [कः स देवः ?]

रमणीयचरणः—

सोऽयं यः स्वयमद्वितीयपदवीसाम्राज्यधौरंधरी-
मासाद्य प्रतितिष्ठति स्म महिमाकारे वभद्रासने ।
यश्च व्याधकुले वसन्निव महीपालात्मजो व्याधतां
जीवत्वं गतवान्विमोहनशतः स्वस्मात्पदाद्भ्रंशितः ॥ ११ ॥

सत्त्वशुद्धिः— अज्ज, किं पत्थुदं तस्स देवस्स । [आर्य, किं प्रस्तुतं तस्य देवस्य ।]

रमणीयचरणः— पाणिग्रहणमहोत्सवः ।

सत्त्वशुद्धिः— अज्ज, अत्थि खु तस्स पुढमो पडिग्गहो देवी, या बुद्धि त्ति अन्तःकरणं ति मणं त्ति चित्तं त्ति अ भणिअदि । [आर्य, अस्ति खलु तस्य प्रथमः प्रतिग्रहो देवी, या बुद्धिरित्यन्तःकरणमिति मन इति चित्तमिति च भण्यते ।]

रमणीयचरणः— संप्रति तस्यां वैरस्येनोपजातजिहासो देवः ।

सत्त्वशुद्धिः— हद्धि हद्धि, छाआदवाणं विअ समणिअदाणं वि ताणं ईरिसो दसापरिणामो [हा धिक्, हा धिक् । छायातपयोरिव समनियतयोरपि तयोरीदृशो दशापरिणामः ।]

रमणीयचरणः— वत्से, छायातपयोरिवेति निदर्शनो दृष्टान्तः ।

छायैषा पुनरातपोऽयमिति च स्पष्टं प्रतीतात्मनो-
रन्योन्यं व्यतिषक्तयोरपि तयोर्भेदः सुखं गृह्यते ।
अन्योन्यात्मकयोरनादिसमयादन्योन्यताद्धर्म्ययो-
र्बुद्धिर्जीव इति द्वयोरपि तयोर्भेदग्रहो दुर्लभः ॥ १२ ॥

सत्त्वशुद्धिः— अज्ज, ईरिसी अ देवी कीस देवेण विरसदाए गोअरीकिदा ? [आर्य, ईदृशी देवी कस्मादेवेन विरसतायां गोचरीकृता ?]

रमणीयचरणः— यतस्तत्संगमप्रभृति सुखमिति किंचिन्न जानाति देवः । तथा हि,

रागद्वेषकषायितस्ववपुषा बुद्ध्या समालिङ्गितः
पुण्यापुण्यमयेषु कर्मसु ततो मोहात्प्रवृत्तः स्वयम् ।
देहाद्यात्मतयाऽथ कर्मजनितं स्वर्गादिरूपं फलं
भुञ्जानो जनिहानिदुःखजलधेरावर्त आवर्तते ॥३ १ ॥

उक्तं च मां प्रति गर्भगृहं प्रविष्टेन देवेन,

संसाराध्वनि संकटे निरवधौ तापत्रयोत्पीडिते
यातायातकृता यया मम चिरादात्मेत्थमायास्यते ।
अस्माद्गर्भगृहाद्बहिर्यदि विनिर्गच्छेत किंचिन्मया
सैषाऽनर्थकरी तदैव सहसोत्सृष्टेति निश्चीयताम् ॥ १४ ॥ इति ।

सत्त्वशुद्धिः— हद्धि हद्धि । साहसव्ववसाओ देवो । अज्ज, कहं सो गब्भघरअं पविट्ठो ? इट्ठादिकारिदाए धूमादिमग्गेण चन्दलोअं गदो त्ति खु सुणिज्जइ । [हा धिक् , हा धिक् । साहसव्यवसायो देवः । आर्य, कथं स गर्भगृहं प्रविष्टः ? इष्टादिकारितया धूमादिमार्गेण चन्द्रलोकं गत इति खलु श्रूयते ।]

रमणीयचरणः— वत्से, श्रूयताम् ,

गत्वा चन्द्रमसं विभूत्यनुभवात्प्रक्षीणपुण्यस्ततो
भूलोकेऽवतरन्कपूयचरणं जित्वा मयाऽऽलम्बितः ।
श्रद्धाद्याहुतिपञ्चकेन च पथा योनिं गतो ब्राह्मणीं
गर्भागारमनुप्रविश्य दशमे मासे ततो निर्गतः ॥ १५ ॥

संप्रति च,

इन्द्रियहयं मनोमयरश्मिचयं बुद्धिसारथिसनाथम् ।
देहरथमास्थितोऽयं देवो विषयाटवीषु पर्यटति ॥ १६ ॥

सत्त्वशुद्धिः— कहं इदं वि एव्वं णाम । [कथमिदमप्येवं नाम ।]

रमणीयचरणः— वत्से, अस्यदस्ति कारणं देवीजिज्ञासायां देवस्य, यत्पुराणज्योतिर्विदामनुक्रमणम् । यथा,

बुद्धित्यागेन देवस्य स्वपदप्राप्तिरिष्यते ।
बुद्धित्यागश्च विश्वातिशायिदारान्तरान्वयात् ॥ १७ ॥ इति ।

सत्त्वशुद्धिः— अज्ज, का उण कण्णा तारिसी जाए जोएण देवस्स सपदप्पत्ती ववदिसिज्जइ । [आर्य, का पुनः कन्या तादृशी, यस्या योगेन देवस्य स्वपदप्राप्तिर्व्यपदिश्यते ।]

रमणीयचरणः— अद्यापि नावधार्यते । प्रेषितश्चावन्मया तादृशकन्यान्वेषणायापातबोधो नामाधुनिको देवानुचरः ।

सत्त्वशुद्धिः— कहं विअ एदं घडिज्जइ ? [कथमिवैतद्घटिष्यते ?]

रमणीयचरणः— किं तादृशी कन्यैव दुरुपलम्भेति तथा ब्रवीषि, आहो स्विदुपलब्धाऽपि देवस्य दुर्लभेति ?

सत्त्वशुद्धिः— तह तह अ । [तथा तथा च ।]

रमणीयचरणः— अयि वत्से,

देवोऽयं स्वपदाच्च्युतः किल कुतो भूयोऽपि तस्योदयः
श्रेयो वा तदिदं पुमर्थपरिषन्मूर्धाभिषिक्तं कुतः ।
इत्येवं यदि मन्यसे हृदि तदा मिथ्यैव ते निश्चय-
स्तत्तस्य क्व गतं पदं क्व नु गतो देवः स वा संप्रति ॥ १८ ॥

परं तु मोचनीयो देवः पाशबन्धादज्ञानवर्मण ऐन्द्रजालिकस्य । य एषः,

विक्षेपावृतिशक्तिमाञ्जडमयो मोहात्मको दुःखभू-
रक्षानप्रतिबिम्बतः प्रकटयन्नात्मानमप्यन्यथा ।
आकाशानिलहव्यवाहसलिलक्ष्मोण्यात्मभिः पञ्चभि-
र्भूतैरातनुते निजां परिणतिं पञ्चीकृतिप्रक्रमैः ॥ १९ ॥

सत्त्वशुद्धिः— अज्ज, किं सो जो देवीए तादो त्ति सुणिज्जइ । हद्धि हद्धि । दुज्जओ खु सो । [आर्य, किं स यो देव्यास्तात इति श्रूयते । हा धिक्, हा धिक् । दुर्जयः खलु सः ।]

रमणीयचरणः— (सरोषम्) वत्से, किमुच्यते दुर्जय इति ।

आत्मस्वामिनमिन्द्रजालविधिना पाशेन बध्नाति यः
पश्यैनं पशुकल्पमल्पधिषणं बद्ध्वा पदाऽऽक्रम्य च ।
छिन्दन्क्रन्दत एव तत्त्वमसिना तस्याङ्कं खण्डशो
विश्वग्रासपरस्य तेन महतो भूतस्य कुर्यां बलिम् ॥ २० ॥

सत्त्वशुद्धिः— अज्ज, मा कुप्प । अरिहिं कामादिहिं करिज्जन्तसाहाअओ सो सङ्किदव्वो त्ति तह मन्तेमि । [आर्य, मा कुप्य । अरिभिः कामादिभिः क्रियमाणसाहायकः स शङ्कितव्य इति तथा मन्त्रयामि ।]

रमणीयचरणः—

कामादयः सन्तु सहस्रमस्य सहायभूता बलिनस्तथाऽपि ।
महत्तरैरात्मगुणैर्भृतस्य ममाग्रतः स्थातुमिह क्षमः कः ॥ २१ ॥

(उभौ परिक्रामतः ।)

रमणीयचरणः— (निरूप्य) कथमित एव देवः ।

चिराय सोऽयं मृगयाप्रवृत्तः प्रमत्तया सारथिभावभाजा ।
विकृष्यमाणः परितोऽपि देव्या गुरुव्यथः संमुखमभ्युपैति ॥ २२ ॥

(ततः प्रविशति यथानिर्दिष्टो जीवः, बुद्धिश्च रथेन, विभवतश्च परिवारः ।)

जीवः—

स एष मधुरः स्वरो रुचिर एष रूपोच्चयः
सुसौरभमिदं त्वियं शिशिरता रसोऽसाविति ।
इतः श्रवणमेकतो नयनमन्यतो घ्राणम-
प्यतस्त्वगपि हन्त मां रसनमग्रतः कर्षति ॥ २३ ॥

देवि, स्तिमितगतयः क्रियन्तां वाजिनः । यतः,

धावन्तो विषयेषु सांप्रतममी रथ्यास्तव प्रेरणा-
द्व्याकर्षन्ति यथायथं तत इतस्त्वामन्ततो नामपि ।

आस्तां तावदिदं रथस्य तु महानायासयोगः परं
न ह्येष क्षमते शिरीषसुमतोऽप्यत्यन्तमापेशलः ॥ २४ ॥

कथमेषा मद्वचनमनाकर्ण्य विघूर्णते भूताविष्टेव । भवतु, एतानेवाश्वान्प्रति सान्त्वयामि ।

श्रवणरसनघ्राणत्वङ्नेत्र हन्त भवन्मुखैः
स्थितमभिहते वस्तुन्यस्तोकसाहसवृत्तिभिः ।
अलमलमितः श्रान्तं भूयः सुखेन विरम्यता-
महमुपरतो मा मा कर्षन्तु मामयमञ्जलिः ॥ २५ ॥

अथ वा न दुर्मेधेष्वेतेषु सान्त्ववादः क्रमते । हन्त हन्त,

अयं शताङ्गः परिजर्जराङ्गः पदे पदे शङ्कितभङ्गमास्ते ।
दुष्टा हयाः कष्टदशा च देवी कथं नु कल्याणमिदं भजेयम् ॥ २६ ॥

(आकाशे) रमणीयचरण, कासि भोः कासि ।

चिरादेतावन्तं समयमतिघोरे भवपथे
न किं पर्याप्तोति भ्रमणमिदमेतावदपि मे ।
कियन्तं वा कालं भ्रमयितुमितोऽपि व्यवसितं
यथासंकल्पं ते भवतु मम वा किं प्रतिहतम् ॥ २७ ॥

रमणीयचरणः— (उपसृत्य) विजयतां देवः ।

जीवः— अये रमणीयचरण,

अहं भ्रामं भ्रामं क्रकचपरुषे वै श्रुतिपथे
परिश्रान्तो नातः पदमपि सखे र्थी विचलितुम् ।
प्रभुत्वं मय्यार्ते प्रकटयसि किं सांप्रतमिदं
तवोपेक्षाया वा किमु समुचितोऽसावसरः ॥ २८ ॥

रमणीयचरणः— दासजनेऽस्मिन्न सांप्रतमेतिमात्रं वचनं कल्याणक्षेत्रवेदेश्वरस्य ।

जीवः—(सनिर्वेदम्) अतिचारिण्या बुद्ध्या सह संसरतो मम कल्याणे का न्यूनता नाम । यथा,

रथ्याना जनुषः पराङ्मुखतया नित्यं प्रवृत्त्युन्मुखा-
न्भूयः प्रेरणकर्मणा स्वयमपि प्रोत्साहयन्ती मुहुः ।
स्वस्थं मां विषमेष्वनर्थबहुलेष्वाकृष्य चाकृष्य च
भ्राम्यन्ती कृपया ह्रिया च रहिता नाद्यापि विश्राम्यति ॥ २९ ॥

रमणीयचरणः— देव, समक्षमेव देव्याः कथमेवमाक्रोशः क्रियते ।

जीवः— एषा संप्रत्यात्मानमपि न जानाति । पश्य पश्य,

कासारान्तरमास्थिता जलझरी कुल्याऽध्वना निःसृता
केदाराभिगता यथैव हि तदाकारेण संपद्यते ।
तद्वद्बुद्धिरपीयमिन्द्रियचयद्वारा बहिर्निर्गता
व्याप्य स्वान्विषयांस्तदाकृतिगणेनाकारिता वर्तते ॥ ३० ॥

रमणीयचरणः— तर्हि न खेदावसरो देवस्य ।

दीर्घा प्रदीपवलयस्य मरीचिकेव बुद्धिर्बहिः प्रसृमरा विषयान्प्रयातु ।
आरुह्य गच्छतु भवानपि तां प्रमाता दोलाविहृत्यनुभवेन विनोद्यमानः ॥ ३१ ॥

जीवः— को नाम विनोदः संसारविषवल्लरीबीजन्यासेन प्रमातृभावेन । तथा हि,

प्रमातृत्वावेशे सति भवति कर्मस्वधिकृतिस्ततः कर्तृत्वं स्यात्तदनु फलभोक्तृत्वमपि च ।
विमुक्तस्यानेन ध्रुवमखिलदुःखप्रशमनं विमुक्त्यर्थोपायस्तदनुसरणीयः प्रथमतः ॥ ३२ ॥

रमणीयचरणः—(किंचिदिव परावृत्य) वत्से सत्त्वशुद्धे, एहि वन्दस्व देवम् ।

सत्त्वशुद्धिः—(उपसृत्य) देव, पणमामि । [देव, प्रणमामि ।]

जीवः—वत्से, अभिमतेन युज्यस्व ।

सत्त्वशुद्धिः—अहिमदा मे देवी । [अभिमता मे देवी ।] (इति बुद्धेरङ्कमारोहति ।)

जीवः—अहो, सत्त्वशुद्ध्याः संस्पर्शमात्रेण प्रसन्ना देवी प्रकृतिस्था च संवृत्ता ।

बुद्धिः—वच्छे सत्तसुद्धे, अविरलं मं परिस्सजेहि । [वत्से सत्त्वशुद्धे, अविरलं मां परिष्वजस्व ।]

सत्त्वशुद्धिः—(तथा करोति)

बुद्धिः—वच्छे, अज्जउत्तो वि संभाविअदु परिस्सङ्गेण [वत्से, आर्यपुत्रोऽपि संभाव्यतां परिष्वङ्गेण ।]

जीवः—देवि, मा मैवम् । यतस्त्वयि परिष्वक्तायामहमपि परिष्वक्त एव ।

ध्यायतीव जनस्त्वेष ध्यायन्त्यां त्वयि वल्लभे ।
चलतीव चलन्त्यां च न स्वतन्त्रः स्वयं क्वचित् ॥ ३३ ॥

बुद्धिः—ईरिसो अहिणिवेसो अत्थि जणस्स अज्जउत्तस्स । [ईदृशोऽभिनिवेशोऽस्मिज्जने आर्यपुत्रस्य ।]

जीवः—किमेतदुपचारः ।

नीरक्षीरवदाद्ययोरुपनतः सम्बन्धतोरेकता
विश्लेषस्य कथा कथंचिदपि न स्वप्नेऽपि संभाव्यते ।
किं च त्वद्गुणसारतामवैमतः कोऽपि क्वचित्ते च
प्रायेण व्यपदेशयाजनमहं जातो जगन्मण्डले ॥ ३४ ॥

बुद्धिः—एदं वि णाम अज्जउत्तस्स पडिग्गहप्पहावो । कहं अण्णहा मुद्धप्पकिदीए वि मह तह तह प्पहासंभवो । [एतदपि नामार्यपुत्रस्य परिग्रहप्रभावः । कथमन्यथा मुग्धप्रकृतेरपि मम तथा तथा प्रथासंभवः ।]

जीवः—

मुग्धा तव प्रकृतिरस्तु तवेयता किमायातमायतविशालशिलोलदृष्टे ।
मूढः पितेति तनयोऽपि कथं तथा स्यादुल्लालयन्नयितसमस्तफलाकलापः ॥

अपि च,

मुग्धे देवि परिग्रहस्त्वमिति यत्तेनानुभावेन मे
जीवो जीवति इति प्रशस्तिरियती विश्वं यया व्याप्यते ।
नो चेदेवमपाणिपादवपुषः सत्ताऽवशिष्टस्य ते
कान्तस्यास्य गुणोज्झितस्य सुजने नामापि गृह्णातु कः ॥ ३५ ॥

रमणीयचरणः—देव्यायत्त एव देवस्य सांसारिकः सर्वो व्यवहार इत्येतल्लिखितपठितमेव लोकानाम् ।

जीवः—अयि देवि,

तावत्संसृतिविभ्रमो मम भवेद्यावच्चया संगमो
विश्लेषो यदि मज्जनेव ध्रुवं मन्ये किमन्यत्तदा ।

किं पश्यामि किमु स्पृशामि किमहं जघ्रामि जिघ्रामि किं
किं वा नाम शृणोमि किं मुनरहं भुञ्जामि यत्तेजतः ॥ ३७ ॥

बुद्धिः—सह रूढमूलो ममदाहिणो अज्जउत्तस्स एवं वाहरेइ । [नन्वि रूढमूलो ममताभिमान आर्यपुत्रमेवं व्याहारयति ।]

जीवः—देवि, अहंताभिमान इति वक्तव्यम् ।

रमणीयचरणः—ईदृशमिदं दाम्पत्यस्य निरतिशयस्य सहजो देवस्य देवस्य वा ।

सत्त्वशुद्धिः—एवं एदं । [एवमेतत् ।]

जीवः—रमणीयचरण, कुतः प्रक्षान्तवेग इव स्थो दृश्यरोः ?

रमणीयचरणः—अवसितो विषमो जागरिन्तानां वनेचेलाः; प्रत्यासन्नश्च स्वप्नारामः । ततश्च,

स्वप्नारामस्य सांनिध्यात्सुप्तेष्विन्द्रियवायुषु । प्रक्षान्तस्पन्दबाधो रथोऽयमवतिष्ठते ॥ ३८ ॥

जीवः—कथं संनिहितः स्वप्नारामः ? (परितो दृष्टिं प्रसार्य)

कुटजवकुलपल्लीकुन्दमन्दारतानामधुरिपलपालीमांसलाङ्गावकाशा ।
समदशकुनिवृन्दास्पन्दनादाभिरामा स्फुरति दिगुपनयं स्वामिनारामसीमा ॥ ३९ ॥

अये रमणीयचरण, इहस्थेन त्वया परिवाल्यतामेष रथः । यावदहममुमारामं प्रविश्य सत्त्वशुद्धिद्वितीयया देव्या सह विहरामि ।

रमणीयचरणः—तथा । (इति स्थितः ।)

जीवः—(देव्या सत्त्वशुद्धया च सह नाडीद्वारा स्वप्नारामप्रवेशं नाटयित्वा) देवि, अत्रायं पुरुषः स्वयंज्योतिरत्रभवत्याः साहायकमपेक्षते ।

बुद्धिः—पिअं मे । [प्रियं मे ।]

जीवः—(समन्ताद्वलोक्य) अहो अस्य स्वप्नारामस्य रमणीयकम् । देवि, दृश्यतामाभिरूप्यमारामस्य । इह हि,

मरकतमणिच्छायाः केचिन्महीरुहराशयः कनकनिकषस्निग्धाश्चान्ये परे स्फटिकस्फुटाः ।
दलमिदुपलश्यामाश्चैके कुसुम्भविडम्बिनः कतिचिदितरे नानावर्णाः सुवर्णफलोद्गमाः ॥

अपि च,

क्वचित्प्रतिनवाङ्कुरं क्वचन पल्लवोल्लासवत्क्वचिद्विकचकुड्मलं कुहचिदच्छगुच्छच्छवि ।
क्वचित्फलभरानतं क्वचन भृङ्गसंघातभृत्सुहृद्भवति गन्धवद्वनमिवेदमानन्दनम् ॥ ४१ ॥

इन्त इन्त दृष्टनष्टस्वरूपाणि पूर्वदृष्टसरूपाणि प्रतिक्षणोन्निद्रव्यक्त्याकृतिजात्यन्यथात्वभाङ्मयूखानि वस्तूनि । तथा हि,

हस्तीत्याकलितः क्षणेन स महानद्रिः समापद्यते
सद्यः स द्रुमतामुपैति स पुनः पक्षिप्रथां गाहते ।
अज्ञातं शतयोजनान्तरितमप्यध्यक्षमालक्ष्यते
वस्तु प्राप्तिमदप्यपूर्वमिव संप्राप्तव्यमास्ते पुनः ॥ ४२ ॥

देवि, दीयतामितो दृष्टिः ।

बालातपस्पन्द्रिकया तरुण्या संश्लिष्यते संप्रति निर्विरोधम् ।
द्वित्रेव किंचिन्मुकुलीकृतानि वापीमिरब्जोत्पललोचनानि ॥ ४३ ॥

बुद्धिः—(विलोक्य विस्मयस्तैमित्यं रूपयति)

(नेपथ्ये कलकलः ।)

जीवः—(कर्णं दत्त्वा, सोल्लासम्)

शुककेकिकोकिलमधुव्रतध्वनैरविभाव्यमाननिजभेदवैभवम् ।
ललितस्वरक्रमविशेषलक्षितं सुतनोरिव व्यवहृतं निशम्यते ॥ ४४ ॥

देवि, आरामसीमायामवधारय श्रुतिम् ।

बुद्धिः—(अश्रुतिमभिनीय साङ्गभङ्गं तिष्ठति ।)

जीवः—सत्त्वशुद्धे, देवी निद्रालसेव लक्ष्यते । धारयस्व तावदेनाम् ।

सत्त्वशुद्धिः—(तथा करोति ।)

(पुनर्नेपथ्ये)

आरामभेव मायोत्थं स्वप्ननिर्माणलक्षणम् । मम सर्वेऽपि पश्यन्ति न मां पश्यति कश्चन ॥४५॥

जीवः—(श्रुत्वा) अतिगभीरमनोहरं वचनम् ।

(पुनर्नेपथ्ये)

उपर्युपरि संचरन्नपि न कश्चिदक्षेत्रविद्विरण्यनिधिमन्तरे विनिहितं यथा विन्दति ।
न विन्दति तथैव मामहरहर्भजन्नप्यहो विमोहपिहितो जनस्तदिह कस्य किं वा ब्रुवे ॥४६॥

जीवः—(श्रुत्वा) असंशयं निरतिशयरूपलावण्यसौन्दर्यपर्यवसानभूमितया स्वस्यानुरूपरमणानुपलम्भसंभूतमारामाभिमानिन्या निगूढायाः कस्याश्चित्कन्यकाया वचनमेतदिति मे निश्चयः। इन्त इन्त,

अकृत्रिममनोज्ञोऽयमक्षराणामनुक्रमः । अखण्डानन्दपदवीमध्यारोपयतीव माम् ॥ ४७ ॥

वत्से सत्वशुद्धे,

मीनस्त्रीव महानदीतटभुवोः स्वच्छान्तवृद्धात्मयोः
पर्यायेण गतागतं विदधती देवी निकामक्लमा ।
एषोऽहं च तथा तथा व्यवहरन्प्राप्तोऽस्मि राम श्रमं
व्योमाग्रे परिघण्डलानि विचरन्नाथो यथा पक्षिणाम् ॥ ४८ ॥

यदतिसंनिहितेऽस्मिन्नतिमुक्तात्समण्डपे निद्रालसां देवीं सुखशायिनीं विधेहि । अहमप्यारामविराम-
भुवमभिगम्य निर्धारितशब्दप्रवृत्तिमूलस्तदेवातिमुक्तात्समण्डपमनुप्रवेक्ष्यामि ।

सत्वशुद्धिः—(तथा करोति ।)

जीवः—(परिक्रम्यावलोक्य च, सहर्षाश्चर्यसंभ्रमौत्सुक्यम्) हन्त, सफलमद्य संजातं जन्म ।

इयं सा कल्याणी सुललितलतामूलनिलया पयोदेनारूढा तडिदिव जगन्मोहनतनुः ।
अवस्थाभेदेन स्थितिमुपगता काचिदधुना तदानन्दस्फूर्तिः सुतनुरिति संमोहयति माम् ॥

हन्त, न पर्याप्नुवन्ति सहस्रमपि लोचनानि सहस्रलोचनस्य सौन्दर्यमस्या निर्वर्णयितुं, वर्णयितुं
वा वाचोऽपि वाचस्पतेः । तथा ह्यस्याः,

श्रीर्विन्दुः शरदिन्दुरास्यगलितो दृक्कोण इन्दीवरं लेखा हासरुचां सुमान्यधरभूसंपल्लवः पल्लवः ।
अंशो मेरुरसंशयं मृगदृशो वक्षोजयोरुच्चयोस्तन्मन्ये वपुरेकदेशविभवो विश्वश्रियोऽपि श्रियः ॥

अपि च,

पादौ पद्मभुवः श्रियः सहचरौ पाणी शिवव्रञ्जनौ
केशाः केशवदिव्यरूपसुहृदः श्रुत्यन्तरङ्गे दृशौ ।
एतस्यास्त्रिजगत्यचुम्बितचमत्कारावलम्बादृते-
रङ्गं सर्वमनङ्गमङ्गलमहो वर्ण्येत किं केन वा ॥ ५१ ॥

किं बहुना,

करम्बयति चेदियं कमलगर्वसर्वंकषाम्पाङ्गपरिपाटिकाकलमलं सुराणां श्रिया ।
अथ स्वरसमात्मना यदि कदाचिदालिङ्गनं तरङ्गयति जीवतो मम स एव मोक्षोत्सवः ॥

का पुनरेषा भवेत् । अथ वा भवतु या काचिदेषा । पश्चादशेषं विचारयिष्यामि । सर्वथा
तावदेनया संप्रत्येष संवृत्तः । (इति परिक्रम्य, निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

॥ विष्कम्भकः ॥

(ततः प्रविशत्यसूया ।)

असूया—अणत्तम्हि अण्णाणवम्भणा हेरदजालविआ महाराएण । जह, [आत्मनाऽस्यज्ञान-ब्रह्मणा महेन्द्रजालविदा महाराजेन । यथा,] 'असूये, इतो गत्वा मद्वचनादुच्यतां वत्सा बुद्धिः, नक्तं त्वयि प्रणयायान्यसक्तो देवः । तदप्रमत्तया त्वया भवितव्यम्' त्ति । अण्णं अ. [इति । अन्यच्च] 'अस्ति तस्य शुद्धिरिति तदायाः प्रियसखी । असंनिहितायां तस्यां तदात्वोचितवेषया त्वया तत्र गन्तव्यम्' त्ति । तदो मए वि भीएं णिअवेसं उज्झिअ सोम्म-वेसो गहीओ । इदं उण एत्थ चिन्तणिज्जं । भट्टिदारिआए णिच्चसंगदाए अत्तसुद्धीए कहं विस्सेसो भविस्सदित्ति । [इति । ततो मया बीभत्सं निजवेषमुज्झित्वा सौम्यवेषो गृहीतः । इदं पुनरत्र चिन्तनीयम् । भर्तृदारिकया नित्यसंगतायाः सत्त्वशुद्धेः कथं विश्लेषो भविष्यतीति । (परिक्रम्यावलोक्य च) को एसो खलिदगई इदो एव्व अभिवट्टइ । अहवा, असुक्खदंसिदाए आवादबोहो त्ति णं तक्केमि । [क एष स्खलितगतिरित एवाभिवर्तते । अथवा, असूक्ष्मद-र्शितयाऽऽपातबोध इत्येनं तर्कयामि ।]

(ततः प्रविशत्यापातबोधः ।)

आपातबोधः—

तातस्याध्ययनस्य मातुरपि मे शक्तेः प्रसादोदया-
द्विक्रान्तस्य न नाम रूपविषये नासादितं किंचन ।
विद्यास्थानतिमबसंभृततनोराम्नायकाण्डो गिरेः
क्षुण्ण एव मया पुनः सरणयः स्वर्गापवर्गस्पृशः ॥ १ ॥

असूया—(उपसृत्य) वच्छ आवादबोह, कुत्थ पत्थिदो सि । [वत्स आपातबोध, कुत्र प्रस्थितोऽसि ?]

आपातबोधः—(स्वगतम्) कैषा परिचितस्येव मे नाम गृह्णाति । भवतु, पृच्छामि । (प्रकाशम्) कां पुनरत्रभवतीमवगच्छामि ?

असूया—(स्वगतम्) कहं उण एदस्स पडिवत्तव्वं । [कथं पुनरेतस्य प्रतिवक्तव्यम् ।] (विचिन्त्य) एव्वं भणिस्सं । [एवं भणिष्यामि ।] (प्रकाशम्) वच्छ, तुह वा कहं पडिहाइ । [वत्स, तव वा कथं प्रतिभाति ?]

आपातबोधः—भगवती साधनसंपत्तिरिति मे मतिः ।

असूया—(स्वगतम्) एसो दिट्ठिआ मह सम्मं णाअदे [एष दिष्ट्या मम सम्मतः] तस्मादेनं अवतुल्य व्यवहरिष्यामि] (प्रकाशम्) अह इं। [अथ किम्।]

आपातबोधः—(सहर्षम्) अहो प्रवर्त्तव्या चेतना स्वयमुद्भूतैव। भो भगवते, अत्रभवतीं खल्वन्वेषयामि सत्त्वशुद्ध्या नियोगेन।

असूया—को णिओओ? [को नियोगः?]

आपातबोधः—सत्त्वशुद्धिरमात्यरमणीयचरणस्यानुसरणेन ब्रह्मजिज्ञासायाः समीपं प्रतिष्ठमाना मामेवमाह, 'वत्स, मद्वचनादुच्यतां प्रियसखी साधनसंभारैः। एकाकिनी देवी मदागमनपर्यन्तं त्वयाऽभिरक्षणीयेति।'

असूया—(स्वगतम्) कहं एआइणी भट्टिदारिआ? ता एसो अवसरो एव्व मए ताए सल्लविदुं [कथमेकाकिनी भर्तृदारिका? तर्ह्येष एवसर एव मम तया संलपितुम्।] (प्रकाशम्) कहिं दाणिं देवो देवी अ? [कुत्रेदानीं देवो देवी च?]

आपातबोधः—अतिमुक्तात्तमण्डपेऽर्धबुद्धः देवो वर्तते, देवस्तु ब्रह्मचर्यनाम्नि प्रथमाश्रमेऽमात्यरमणीयचरणेन सह संलपन्नास्त इति किंवदन्ती।

असूया—वच्छ, कहिं पत्थिदो सि मए पुच्छिदो सि। [वत्स, कुत्र प्रस्थित इति मया पृष्टोऽसि।]

आपातबोधः—

आम्रावस्य गिरेरन्ते काचिदप्राकृताकृतिः। गुहायां निहिता दृष्टा कन्या सामान्यतो मया॥
अद्भुतं तद्रूपमिति चित्रमारोप्य देवस्य प्रदर्शयितुं प्रस्थितोऽस्मि।

असूया—अहं वि णिओअं असुण्णं करिस्सं [अहमपि नियोगमशून्यं करिष्यामि।

(उभौ परिक्रम्य निष्क्रान्तौ।)

इति मिश्रविष्कम्भः॥

(ततः प्रविशतो जीवो रमणीयचरणश्च।)

रमणीयचरणः—ततः, ततः।

जीवः—

ततः स्वप्नारामावधिभुवि गता मन्थरगता वरारोहा या मे तडिदिव पुरः प्रादुरभवत्।
तयाऽथ प्रत्यक्षं सुदृढमुपगूढाङ्गक इव क्षणेन स्तब्धोऽहं तदुपरि न जानामि किमपि॥

रमणीयचरणः—अपि नामेदं मोहनम ?

जीवः—मा तावदेवं मंस्थाः ।

सस्नेहं परिरम्भसंभ्रमदृशाऽऽरम्भे विलोलभ्रुव-
स्तस्यास्तुङ्गपयोधरक्षितिधरासङ्गातिभारादिव ।
आनन्दाम्बुनिधेरगाधपयसो मध्ये निमग्नस्तदा
बाह्यं किंचन किंचनान्तरमहं नावेदिषं वस्तुतः ॥ ४ ॥

रमणीयचरणः—अथापि लोको न श्रद्दधाति ।

जीवः—(सामर्षम्)

दृष्ट्वा सा वरवर्णिनी त्रिभुवनोत्तीर्णां तदालिङ्गना-
दानन्दानुभवो निरन्तरतरः स्पष्टो ममासीत्तदा ।
अत्यर्थं विचिकित्सया किमधुना उक्त्वा दशायामस-
ल्लोको विप्रतिपद्यते यदि भवत्वेतावता का क्षतिः ॥ ५ ॥

रमणीयचरणः—नूनमेवमनुभूतं दैवेन । साक्षिणा पुनरत्र भवितव्यम् ।

जीवः—नन्वनुभव एव साक्षी । किं साक्षिणः साक्ष्यन्तरापेक्षया । न खलु दीपो दीपान्तरमपेक्षते स्वयं प्रकाशितुमन्यं प्रकाशयितुं वा ।

रमणीयचरणः—देव, किंरूपोऽनुभवः ।

जीवः—अनुभवरूप एव ।

रमणीयचरणः—विशिष्याभिधीयताम् ।

जीवः—अभिहितोऽपि विशेषो न प्रतिभाति भवादृशस्य ।

रमणीयचरणः—कुतो न प्रतिभाति । बुभुक्षितं न प्रतिभाति किंचिदिति खलु प्रवादः । न चाहं बुभुक्षितः, यतो विधिहुतदधिमधुपयोघृतप्रायहविर्विवर्तविग्रहोऽस्मि ।

जीवः—हन्त, तर्हि प्रष्टव्यो भवान्कीदृशानि तानि द्रव्याणीति ।

रमणीयचरणः—दधि मधुरं मधु मधुरं क्षीरं मधुरं घृतं च मधुरं तत् ।

जीवः—कीदृशं माधुर्यम् ?

रमणीयचरणः—

माधुर्यमनुभवैकप्रतिपत्तव्यं न शक्यमभिधातुम् ॥ ६ ॥

जीवः— यद्येवं कथं मामनुभवं पृच्छसि ?

रमणीयचरणः— (स्वगतम्) हन्त, निर्जितोऽस्मि दैवेन । (प्रकाशम्) देव, आस्तां तावदयमनुभवकलहः । कथ्यतां नाम कथाशेषस्तत्रभवत्याः ।

जीवः—

अमेदं गतयोरेवमावयोः पक्षसोरिव । विधूतपक्षपातेन विधिना कलहंसितम् ॥ ७ ॥
अनन्तरमुपनीतोऽस्म्यध्ययनदुरवस्थमुमाश्रमम् ।

रमणीयचरणः— दुर्लभस्वास्थ्य एवायं प्रथमाश्रमोऽध्ययननैयत्येन ।

तथा हि, उच्चैरुच्चरतः पदक्रमगतान्युच्चावचान्यादरा-
दाचार्यस्य चिरस्य शिष्यनिचयः कुर्वन्ननूच्चारणम् ।
तत्रत्यस्वरवर्णविप्लुतिभयाद्दत्तावधानां धियं
बिभ्राणिश्वसितेऽपि न स्ववशतामभ्येति नक्तंदिवम् ॥ ८ ॥

जीवः— बाढमेवम् । अथाप्यत्र वसतो मम समर्थ्यते समग्रमादिमाश्रमधर्मैः प्रियाविरहो वा ।

तथा हि, विद्वेषो मम चन्दने विमुखता माल्ये मनोहारिणि
व्यावृत्तिश्च कुतूहलस्य सुरभेः श्रीखण्डशैलानिलात् ।
शय्यां जहतश्च मे नियमतो भैक्षाशनतो जीवतो
नास्था वस्तुनि कुत्रचिज्जगति यद्भोगाय संभाव्यते ॥ ९ ॥

रमणीयचरणः— अपि ज्ञातं तस्याः कुलशीलादिकं देवेन ?

जीवः— कः कालः कुलशीलादिवेदनस्य ?

दृष्टा लीढा यावन्निमिषमिव तावत्प्रियतमा ममाङ्गानि स्वाङ्गैरकृत परिरब्धान्यविरलम् ।
तया तस्मिन्काले लपितुमधिकारः क इव मे निमग्नस्यानन्दैकरसजलधौ लुप्तसकले ॥

रमणीयचरणः— मा भूनाम दर्शनानन्तरमवसरालाभात्तया सह संलापः । प्राक्तु दर्शनात्प्रवृत्तः पद्यरूपस्तदीयालापः पुनः पठ्यताम् । अपि नाम पर्यालोच्यमाने तस्मिन्कथंचिदभिज्ञायेत कुलशीलादिकं तस्याः ।

जीवः— ओम् । (इत्युक्त्वा 'आरामम्' इत्यादि पूर्वोक्तं पद्यद्वयमाम्रेडयति ।)

रमणीयचरणः— (संपधार्य) अत्र तावदाद्ये पद्ये 'मां न पश्यसि' इत्यनेन स्वस्य दुर्दैव-

स्वमुक्तम् । द्वितीये तु हिरण्यनिधिनिदर्शनोपदर्शनेनान्तर्हितत्वं स्वस्य दुर्दर्शतत्वे निमित्तमुपवर्णितम् । न पुनरिह शीलादीनां कयाऽपि विधया प्रतिभानमस्ति ।

जीवः— किं पुनरुपायान्तरं तदधिगमस्य ?

रमणीयचरणः— देव, सा यथादृष्टमालेख्येऽभिलिख्यताम् । प्रायेण सर्वत्र संचारशीलस्य मम कदाचित्कचिदृष्टचरी भवेत् ।

जीवः— अनुपपन्नं नामैतत् । तथा हि,

नैषा दृष्टचरी न च श्रुतचरी कस्यापि कुत्रापि वा
न क्रोडीक्रियते यतो बहुविधैः सृष्टिक्रमैर्वेधसः ।
चिन्तातूलिकया हृदम्बुजदले रागेण लेख्या परं
तन्वङ्गी कथमत्र चित्रफलके तत्तादृशी लिख्यताम् ॥ ११ ॥

अपि च,

विकारगोचरैर्वर्णैरतिवर्णगुणोदयाम् । विलिखन्नेष तां चित्रे विडम्ब्येत न किं बुधैः ॥

अपि च, आचूडातलमानखाञ्चलमपि प्रत्यङ्गमत्यद्भुता
चित्रे विन्यसितुं तदाकृतिरितो यावन्मयोल्लिख्यते ।
तावद्विप्लुतहर्षसिन्धुलहरीगाढावगाहक्षण-
स्तब्धाङ्गस्य मम स्वतोऽपि परतः कीदृक्क्रियाकौशलम् ॥ १३ ॥

रमणीयचरणः— तथाऽप्यदूरविप्रकर्षेण च्छायामात्रेण तद्रूपमभिविलिखतु देवः ।

जीवः— अस्त्वेवम् । कः कोऽत्र भोः । चित्रं चित्रम् ।

(प्रविश्य)

आपातबोधः— अहमिह । चित्रं चित्रम् । (इति चित्रफलकं जीवस्य हस्ते प्रयच्छति ।)

जीवः— (नाट्येन गृहीत्वा निर्वर्ण्य च, सहर्षप्रत्यभिज्ञम्) अहो संवादः ।

सैषा वधूरिह सुधारसधारयेव सृक्त्या यया श्रुतिरभूदभिपूरितेयम् ।
संदर्शनस्य पदवीमदवीयसीं मे या च व्यगाहत तदोषवनान्तभागे ॥ १४ ॥

अये रमणीयचरण, चित्रगतेयं कियदपि न भिद्यते प्रियायाः पूर्वदृष्टायाः । तथा हि,

तदेवेदं तस्या वपुरपरिमेयात्मविभवं
तदेवास्यं दास्यार्पणविधिकृतार्थीकृतशशि ।
तदेवाश्लिष्टद्वन्द्वं स्वशरणनिषक्तोत्पलकुलं
तदेवैतद्घोरुहयुगलमक्षोभनिहितम् ॥ १५ ॥

(इति स्वहस्तगतमेव चित्रफलकं रमणीयचरणस्य प्रदर्शयति ।)

रमणीयचरणः— (निरूप्य, सशिरःकम्पम्) स्थाने तावल्लोकसामान्याकृतावस्थामभिलाषबन्धो देवस्य ।

जीवः— आपातबोध, क्व पुनरेषा त्वया दृष्टा ?

आपातबोधः— देव, तदपि लिखितमधस्ताच्चित्रफलकस्य । अनुवाच्यताम् ।

जीवः— तथा । (इति वाचयति ।)

आम्नायस्य गिरेरन्ते सेयमप्राकृताकृतिः । गुहायां निहिता दृष्टा कन्या सामान्यतो मया ॥

रमणीयचरणः— देव, सामान्यत इत्यनेन तदीयकुलशीलादिविषये परिज्ञानमापातबोधस्याप्यावयोरिवेति ध्वनितम् । वसतिस्त्वेका तस्या निर्धारिता भवति ।

जीवः— प्रागन्तर्निहितत्वयत्रभवतीपद्ये यदुद्द्योतितं
पद्येऽस्यापि तदेव भाति निहिता दृष्टा गुहायामिति ।
संवादश्च तदाकृतेरिह पुनश्चित्रे मया बोधित-
श्चित्रस्थैव पुराऽपि दर्शनपथं यातेत्यतो निश्चयः ॥ १७ ॥

यदि नाम कुलं शीलं तदीयं न प्रतीयते । अयोनिजा नित्यसिद्धा काचिदेषा भविष्यति ॥

रमणीयचरणः— अहो मीमांसाकौशलं देवस्य ।

उपक्रमोपसंहारमध्यामर्श्यैकरूप्यतः । निर्णीयते क्रियारूप एकोऽर्थः सांप्रतं यतः ॥१९॥

जीवः— आपातबोध, कुत्रत्यैर्वर्णैश्चित्रे कृतैषा । अथ वा ज्ञातम् ।

अप्राकृताकारतया नतभ्रूरनन्यसाधारणरूपधेया ।
अप्राकृतैरेव ततस्त्वयेयमाम्नायवर्णैरभिचित्रिता स्यात् ॥ २० ॥

(चित्रं पुनर्निर्वर्ण्य) हन्त हन्त ।

यस्या दर्शनमेव कामपि मुदं दुग्धे विदग्धे जने
कल्याण्या कथयाऽपि यद्विषयया स्वर्गस्पृहोच्छिद्यते ।

कैवल्यं करतात्करोति यदनुस्पर्शोद्भवा निर्वृति-
स्तामेनां प्रतिलम्भुमद्य न कियत्तप्तव्यमुग्रं तपः ॥ २१ ॥

आपातबोध, अपि प्रज्ञाता भवतः सा गुहा यत्र प्रतिवसति मम प्राणनाडी ?

आपातबोधः— कः संदेहः ?

जीवः— आपातबोध, न कस्यचिदेतत्त्वया प्रकाशयितव्यम्, बहुविघ्नानि नाम श्रेयांसि ।

(नेपथ्ये शिञ्जितमिव)

जीवः— (कर्णं दत्त्वा) नूनं प्रबुद्धा देवी सुषुप्तिभवनादित एवाभिवर्तते । तदेतत्प्रच्छाद्यताम् ।

(इत्यापातबोधस्य हस्ते चित्रफलकमर्पयति । सोऽपि गृहीत्वा कक्षे स्थापयन्नुत्तरीयेणात्मानमवगुण्ठयति ।)

(ततः प्रविशति बुद्धिः ।)

बुद्धिः— (दीर्घमुष्णं च निश्वस्य) हद्धि, हद्धि । जह मन्तिदं असूआए तह एव्व जदि अज्जउत्तो होदि तदो किं करिस्सं । अङ्कुरो खु सा अणत्थरुक्खस्स जा अण्णासत्ती अज्जउत्तस्स । अम्हो जललिवी पुरिसाणं सिणेहो ववहारो अ, जदो तह तह अहिणिविसन्तस्स तह तह अणण्णं ववहरन्तस्स वि अज्जउत्तस्स संपदं अण्णारिसो एव्व आआरो सुणिज्जइ । कहिं अज्जउत्तो कहिं इत्थिअन्तरं कहं वा दुवेण्णं समाअमो त्ति सङ्किदुं वि ण अवआमो । जदो दोसेक्कदिट्ठीए वि असूअए एदं वअणं ण सदन्तं किन्दु अज्जामिस्सस्स तादस्स एव्व एसो संदेसो अवच्चिणेहेण हिदोवदेसप्पउत्तस्स । एव्वं आवदिदे एत्थ संकडम्मि मए किं करणिज्जं ।

[हा धिक् हा धिक् । यथा मन्त्रितमसूयया तथैव यद्यार्यपुत्रो भवति ततः किं करिष्यामि । अङ्कुरः खलु साऽनर्थवृक्षस्य, याऽन्यासक्तिरार्यपुत्रस्य । अहो जललिपिः पुरुषाणां स्नेहो व्यवहारश्च, यतस्तथा तथाऽभिनिविशमानस्य तथा तथाऽनन्यं व्यवहरतोऽप्यार्यपुत्रस्य सांप्रतमन्यादृश एवाचारः श्रूयते । कुत्रार्यपुत्रः क्वत्र स्त्र्यन्तरं कथं वा द्वयोः समागम इति शङ्कितुमपि नावकाशः । यतो दोषैकदृष्टेरप्यसूयाया एतद्वचनं न स्वतन्त्रं किं त्वार्याभिश्रस्य तातस्यैवैष संदेशोऽपत्यस्नेहेन हितोपदेशप्रवृत्तस्य । एवमापतितेऽत्र संकटे मया किं करणीयम् ।] (विचिन्त्य ।) अज्जउत्तम्मि कोवं करिस्सं । दाणिं सावराहो एव्व सो, जेण सुसुत्तघरअम्मि एआइणिं मं उज्झिअ अग्गदो णिग्गदो अज्जउत्तो । [आर्यपुत्रे कोपं करिष्यामि । इदानीं सापराध एव सः, येन सुषुप्तगृह एकाकिनीं मामुज्झित्वाऽग्रतो निर्गत आर्यपुत्रः ।]　　(इति विलक्षणमपसृत्यायथापूर्वमवतिष्ठते ।)

जीवः— (निरूप्य स्वगतम्) कथं देवी कुपितेव दृश्यते । किमस्या ह्यस्तनः प्रियावृत्तान्तो विदितः स्यात् । अथ वाऽन्यदेव कोपस्य कारणं भवेत् । (प्रकाशम्)

एह्येहि सुन्दरि किमन्तरिताऽसि दूरं कल्याणि नन्वयुतसिद्धमुरुं जुषस्व ।
उत्सङ्गमण्डलमलंकुरु मे निविष्टा जीवन्नसौ न सहते किल ते वियोगम् ॥ २२ ॥

बुद्धिः— ण खु अरुहदि एसा तुह उच्छङ्गस्स । [न खल्वर्हत्येषा तवोत्सङ्गस्य ।]

जीवः— का पुनरर्हति ?

बुद्धिः— अप्पा पुच्छिदव्वो । [आत्मा प्रष्टव्यः ।]

जीवः— देवि, त्वमेवात्मा जीवस्य ।

बुद्धिः— इत्तिअं कालं तह एव्व । अज्जप्पहुदि मिच्छावादो एव्व एसो त्ति मे वितक्को । [इयन्तं कालं तथैव । अद्यप्रभृति मिथ्यावाद एवैष इति मे वितर्कः ।]

जीवः— अहो, आत्मन्यप्रत्ययः ।

त्वमहमयमहं त्वं भीरु किं भेदवादैरहमिव तव यन्मे हर्षशोकांशभाक्त्वम् ।
त्वदनुपहितमूर्तेः किं सुखं किं नु दुःखं मम हितमहितं च त्वत्प्रसादैकलभ्यम् ॥

बुद्धिः— अपुव्वो एसो अज्जउत्तस्स आआरभेदो मं एव्वं विआरेदि ।

[अपूर्व एष आर्यपुत्रस्याचारभेदो मामेवं विकारयति ।]

जीवः— (सविमर्शाभिनयम्) देवि, अणुमात्रमप्याचारभेदमात्मनो न पश्यामि । यदप्यद्य सुषुप्तिभवनेऽर्धप्रबुद्धायास्तव स्तोकमुल्लासमाश्रित्य कतिपयक्षणान्किंचिदिव बहिर्मुखोऽस्मि तदपि कार्यगौरवमेवापराध्यति ।

बुद्धिः— जाणामि दाव तं गुरुकज्जं जत्थ पवुत्तिणिमित्तं एसो एव्व महप्पा ।]

[जानामि तावत्तद्गुरुकार्यं यत्र प्रवृत्तिनिमित्तमेष एव महात्मा ।

(इत्यापातबोधमङ्गुल्या निर्दिशति ।)

आपातबोधः— (सभयकम्पम्) प्रसीदतु देवी । (इति उसंभ्रमं च्यवमानचित्रफलकः समुत्तिष्ठति ।

बुद्धिः— (अग्रतश्च्युतं चित्रफलकं गृह्णाति ।)

जीवः— (स्वगतम्) आः प्रमादः ।

बुद्धिः— (चित्रं निर्वर्ण्य, स्वगतम्) कहं एत्थ अहिलिहिदा लोउत्तरगुणुत्तरा का वि मत्तकासिणी । अहो रुव्वं अहो सुन्देरं । हद्धि हद्धि मह वि दिट्ठी एत्थ णिबद्धिज्जइ । किं उण अज्जउत्तस्स । [कथमत्राभिलिखिता लोकोत्तरगुणोत्तरा काऽपि मत्तकाशिनी । अहो रूपमहो सौन्दर्यम् । हन्त हन्त ममापि दृष्टिरत्र निबध्यते । किं पुनरार्यपुत्रस्य ।]
(प्रकाशम्) अज्जउत्त, किं एदं ? [आर्यपुत्र, किमेतत् ?]

जीवः— देवि, आपातबोध एव प्रश्नमर्हति । एतत्प्रसङ्गानभिज्ञः खल्वयं जनः ।

बुद्धिः— णं आवादबोह, कहेहि किं एदं । [नन्वापातबोध, कथय किमेतत् ।]

आपातबोधः— देवि, चित्रफलकमेतत् ।

बुद्धिः— आवादबोह, एत्थ अहिलिहिदं इत्थिअं पुच्छामि ।
[आपातबोध, अत्राभिलिखितां स्त्रियं पृच्छामि ।]

आपातबोधः— न ज्ञायते मया ।

बुद्धिः— केण उण अहिलिहिदा एसा ? [केन पुनरभिलिखितैषा ?]

आपातबोधः— मयैव नाम ।

बुद्धिः— मए एव्व अहिलिहिदा ण जाणिज्जदि अ मए त्ति विप्पडिसिद्धं खु एदं वअणं । [मयैवाभिलिखिता न ज्ञायते च मयेति विप्रतीषिद्धं खल्वेतद्वचनम् ।]

आपातबोधः— न किंचिदिह विप्रतिषिध्यते । यल्लिखितं कन्यारूपं तदृष्टमेव देव्या । विशेषस्तु तदीयनामगोत्रादिर्यत्नावदत्रभवत्या पृष्टः स न ज्ञायत इति मया भूतार्थः कथितः ।

बुद्धिः— चिट्ठदु दाव एदं । कहिं उण तुए दिट्ठा किंणिमित्तं अ चित्तं आरोविदा ? [तिष्ठतु तावदेतत् । कुत्र पुनस्त्वया दृष्टा किंनिमित्तं च चित्रमारोपिता ?]

आपातबोधः— देवि श्रूयतामादितः कथयामि । अस्ति खलु कर्मब्रह्मकाण्डलक्षणाधरोत्तरभागद्वयलोभनीयः शिक्षाकल्पादिप्रभेदभिन्नविद्यास्थानमयप्रस्थोपबृंहितः प्रणवमयकन्दरसुन्दरो महावाक्यमयशृङ्गशृङ्गारितस्तत्प्ररूढब्रह्म वेद्यात्मकसिद्धाञ्जनौषधिविशेषभूषितः संपदध्यासप्रतीकाहंग्रहोपास्तिरूपतरुलतागुल्मौषधिस्तोमकमनीयश्चतुर्विधवर्णाश्रमारण्यश्चरण्यस्तदधिकृतद्वैताद्वैताद्वैतनेकखदसन्मार्गसंसर्गमयचिद्धातुराम्नायनामा गिरिरिशेखरः ।

यत्र हिंस्रैरजस्रोद्यदहमावेशदुर्दशैः । पीड्यन्ते सा भवः पान्था द्वैतवादाख्यभल्लकैः ॥

तत्र चाहमधिकृतो देवेन प्रत्यहं सर्वतः पर्यटामि । पर्यटंश्च,

यद्यद्वस्तु विशेषेण यत्र यत्रोपलभ्यते । तत्तच्चित्रं समारोप्य देवस्योपहराम्यहम् ॥
अद्य तावदियं दृष्टा मया दृष्टिप्रिया वधूः । चित्रमारोपिता चेयं देवस्योपजिहीर्षया ॥

एष वृत्तान्तः । तदिदं चित्रफलकं देवस्यात्मभूतयाऽनयाऽन्तराले बलाद्गृहीतमिति संप्रति निर्भरोऽस्मि संवृत्तः ।

बुद्धिः— आवादबोह, पच्चुप्पण्णमदी खु तुमं । अहं उण अण्णाणवम्मणो अइन्दजालिअस्स अप्पसम्भवा ण सक्का केण वि अदिसन्धादुं । [आपातबोध, प्रत्युत्पन्नमतिः खलु त्वम् । अहं पुनरज्ञानवर्मण ऐन्द्रजालिकस्यात्मसंभवा न शक्या केनाप्यतिसंधातुम् ।]

जीवः— देवि, अपदे ते कोपः ।

बुद्धिः— अण्णादउलणामहेआ जा का वि एसा पाडिहालिएण आलेक्खसरीरेण वट्टन्ती वि एव्वं मं आआसेदि । सा एव्व दिट्ठिआ सेण रूवेण अहिणिप्पज्जन्ती किं किं ण करिस्सदि ।

[अज्ञातकुलनामधेया या काऽप्येषा प्रातिभाभिकेनालेख्यशरीरेण वर्तमानाऽप्येवं मामायासयति । सैव दिष्ट्या स्वेन रूपेणाभिनिष्पद्यमाना किं किं न करिष्यति ?]

(इति साटोपं परावर्तते ।)

जीवः — (चेलान्ते बुद्धिं गृहीत्वा)

त्वं भूषणं त्वमसि मे सकलाऽपि संपत्त्वं जीवितं किमपरं परमस्त्वमात्मा ।
देवि प्रसीद कुपिताऽसि कुतो निकामसात्मन्यहं तु कलयामि न कोपहेतुम् ॥ २७ ॥

बुद्धिः— (बलाच्चेलाञ्चलं विमोच्य सचित्रफलका निष्क्रान्ता ।)

जीवः— हन्त, अगृहीतानुनया गतैव देवी । अये रमणीयचरण, त्वया यथोचितं संविधानकेऽव्यापर्तव्यम् । अहं तु देवीं सान्त्वयामि यावदेषा पुरीतल्लतावितानं न प्रविशति ।

[इति परिक्रम्य निष्क्रान्ताः सर्वे ।]

इति द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

शुद्धविष्कम्भः ॥

(ततः प्रविशति भवितव्यता ।)

भवितव्यता— अहो मह भाअहेअं । [अहो मम भागधेयम् ।]

अणुआ सत्तसुद्धी मे जीवामच्चो पिदा मह । पउत्ती अ णिउत्ती अ किङ्करीओ दुवे विअ ॥

[अनुजा सत्त्वशुद्धिर्मे जीवामात्यः पिता मम । प्रवृत्तिश्च निवृत्तिश्च किंकर्यौ द्वे अपि ॥]

अदो एव्व णिव्वावारम्हि । सम्पदं दु सत्तसुद्धितादाणं कज्जन्तरासत्तदाए अम्होवरि एक्को वावारो आवदिओ । जह सत्तसुद्धी खु तादस्स णिओएण बम्हजिण्णासं आणेदुं गआ । बम्हजिण्णासा उण सहिं साहणसंपत्तिं विणा पदं वि चलिदुं ण सक्कुणोमि त्ति विलम्बइ । साहणसम्पत्ती उण पुढमोवसप्पणिज्जा मं अदिलङ्घिअ बम्हजिण्णासाए सआसं गआ सत्त-सुद्धि त्ति कुविदा । तं अणुणेदुं पत्थिदो तादो । अत्थन्दरे बलवदीए कामवासणाए पुढ-मस्समादो दुदिअस्समं पाविदो साणुअरो देव्वो । तं अ णिस्सेअसमग्गादो भंसेदुं पेसिदा कामादिणो अरिणो अण्णाणवम्मणा । तं एदं पडिकादव्वं त्ति मज्झ अज्झवसाओ । अह वा, तादस्स पाणपदं अप्पउणठ्ठअं देवस्स णिअडम्मि पट्ठावइस्सं । तेण एव्व सव्वं पडिकरिस्सदि । मए उण कुविदा देवी पसादइदव्वा । [अत एव निर्व्यापाराऽस्मि । सांप्रतं तु सत्त्वशुद्धि-तातयोः कार्यान्तरासक्ततया मदुपर्येको व्यापार आपतितः । यथा, सत्त्वशुद्धिः खलु तातस्य नियोगेन ब्रह्मजिज्ञासामानेतुं गता । ब्रह्मजिज्ञासा पुनः सखीं साधनसंपत्तिं विना पदमपि चलितुं न शक्नोमीति विलम्बते । साधनसंपत्तिः पुनः प्रथमोपसर्पणीया मामतिलङ्घ्य ब्रह्मजि-ज्ञासायाः सकाशं गता सत्त्वशुद्धिरिति कुपिता । तामनुनेतुं प्रस्थितस्तातः । अत्रान्तरे बलवत्या कर्मवासनया प्रथमाश्रमाद्द्वितीयाश्रमं प्रापितः सानुचरो देवः । तं च निश्रेयसमार्गाद्भंशयितुं प्रेषिताः कामादयोऽरयोऽज्ञानवर्मणा । तदेतत्प्रतिकर्तव्यमिति ममाध्यवसायः । अथ वा, तातस्य प्राणपदमात्मगुणाष्टकं देवस्य निकटे प्रस्थापयिष्यामि । तेनैव सर्वं प्रतिकरिष्यते । मया पुनः कुपिता देवी प्रसादयितव्या ।] (इति परिक्रम्य निष्क्रान्ता ।)

इति शुद्धविष्कम्भः ।

[ततः प्रविशति जीवः आपातबोधश्च ।]

जीवः—अन्यस्मादपि चाश्रमादयमसौ गार्हस्थ्यनामाऽऽश्रमः
श्रेयानित्यविवादमेव विधिषु प्रत्यक्षमाम्नानतः ।
धर्माधारतया समस्तजनतानामोपकारक्षमं
प्राप्तस्यैनमतोऽखिलोऽपि पुरुषस्यार्थः स्वतः सेत्स्यति ॥ २ ॥

अथ वा, विक्षेपभूयिष्ठोऽयमाश्रमः । अत्र हि,

आस्तां तावदसंभाव्या तस्या दर्शनसंकथा । श्रवणायापि सा तन्वी न लभ्या मम कुत्रचित् ॥

आपातबोधः—सत्यमेतत् ।

गुहायां निहिता ह्येषा दुर्लभातिलम्भना । पामराणामिहस्थानां परमानन्दलक्षणा ॥ ४ ॥

जीवः—सम्यगुक्तं परमानन्दलक्षणेति । तथा हि,

अराभ्योर्वीपरिवृढगतं भानुपानन्दमेकं ब्रह्मानन्दाभिरतिशयः प्रत्यपादि श्रुतौ यः ।
सोऽप्येतस्याः किल सुखनिधेरेकदेशैकदेशे विश्रान्तः स्यादिति मम पुनर्निष्प्रकम्पो वितर्कः ॥

किं बहुना,

स्मरणसरणिरेषा जातुचित्पुण्यभूम्ना मम कथमपि तावन्मन्दमासाद्यमाना ।
हृदयमदयमेव ह्लादपारंपरीभिः परवशयति हन्त प्लावयन्ती नितान्तम् ॥ ६ ॥

आपातबोधः—तर्हि निरन्तरमनुसंधानपद्धतिमवतारयितव्या तत्रभवती ।

जीवः—संध्यास्नानजपाग्निहोत्रनियमस्वाध्यायदेवातिथि-
स्तोमाभ्यर्चनचन्द्रचूडचरणध्यानादि यद्वैदिकम् ।
यद्वा लौकिकमस्ति कर्म गमनव्याहारभुक्त्यादिकं
सर्वं तन्मम सांप्रतं समभवद्विघ्नः प्रियाऽनुस्मृतेः ॥ ७ ॥

आपातबोधः—त्यक्तव्यानि तर्हि कर्माणि ।

जीवः—

ग्रामारामक्षितिपशुधनाद्यैहिकामुष्मिकात्मश्रेयःसिद्ध्यै भवति यदनुष्ठानमात्रेण पुंसाम् ।
काम्यं कर्म प्रबलमपि तत्त्यज्यतां नाम कामं नित्यं नैमित्तिकमपि कथं त्यक्तुमत्र प्रभुः स्याम् ॥

आपातबोधः—आचारेऽभ्युदयं करोति परथा यः प्रत्यवायोदयं
सोऽयं कर्मचयोऽधिकारिभिरिहोपास्यो न तु त्यज्यते ।

त्यक्तश्चेदयमाश्रमः स च परित्यक्तुं तदा शक्यते
त्यागश्चास्य समस्तवस्तुविषयं वैराग्यमाकाङ्क्षति ॥ ९ ॥

जीवः—कर्माणि स्वयमाचरन्नपि सदा बध्येषु तेषामहं
कांचित्कांचिदपि क्षणस्य कणिकां लब्ध्वाऽवकाशं ततः ।
चिन्तायामुपनीय चिन्मयतनुं तामिन्दुकान्ताननां
कान्तामन्तरुदित्वराकुलतया नन्दामि शान्तव्यथः ॥ १० ॥

आपातबोधः—मलयं गच्छतो मन्दरपथानुवर्तनमेतद्यत्कर्मफलवस्तुकामुकस्याश्रमभवतः कर्मदुर्दिने गृहस्थाश्रमेऽवस्थानम् ।

जीवः—अवितथमाह भवान् । तथा हि,

प्रक्रान्तान्यरुणोदये परिसमाप्यन्ते निशीथावधौ
यान्येतानि दिने दिनेऽपि गृहिभिः कर्माणि निर्मातृभिः ।
एतेषामसिधारयेव विषया स्वाच्छन्द्यविच्छेदतो
विश्रान्तिं कलयाऽपि न प्रतिलभे न त्यक्तुमप्युत्सहे ॥ ११ ॥

आपातबोधः—दुस्त्यजो नाम संसारचक्रभ्रमिकुम्भकारः कर्माधिकारः । अत एव.

कर्म कष्टमिति ज्ञात्वा तन्निर्मूलनतत्पराः । केचिदा जन्मनः शुद्धा निबध्नन्ति परां धृतिम् ॥

जीवः—आपातबोध, किं नाम न विद्यते तादृगुद्देशो यत्र मिथानुसंधानपरिपन्थिनां कर्मणामुपरोधः ?

आपातबोधः—अस्त्येव संन्यासनामा महानाश्रमः ।

जीवः—यद्येवं प्रापय मां तमुद्देशम् ।

आपातबोधः—एवं नाम भविष्यति ।

जीवः—कुतो मन्दीकृतं वचनम् ?

आपातबोधः—प्रतिबन्धकाशङ्कया ।

जीवः—किं प्रतिबन्धकं तुर्याश्रमगमनस्य ?

आपातबोधः—किमन्यत्कण्टकोपसर्गमन्तरेण ।

(ततः प्रविशन्ति कामादयः षडरयः ।)

कामः—नारीवद्गगने विचित्ररचनामाधाय विश्वं जनं
तत्र प्रत्ययतः प्रवर्तयितुमप्यद्य प्रगल्भोऽस्म्यहम् ।

किं भूयो घनगन्धसार्यमदिरामांसाद्युपस्कारव-
नारीसंघसहस्रसंपदुदितोल्लासाधिकोपक्रमः ॥ १३ ॥

क्रोधः—

सखा वा बन्धुर्वा सुहृदपि च वा मित्रमपि वा कलत्रं पुत्रो वा भवतु जनको वाऽपि जननी ।
प्रविश्यान्तः क्षोभं सपदि जनयञ्जातकलह-स्मिथ्यो लोकान्शोकार्णवमुपनयेत्को मदितरः ॥

लोभः—

धनदानाधिकस्यापि मया संपृष्टचेतसः । धनिनो नोपभोगाय न त्यागाय धनं महत् ॥

मोहः—

समूहो धूमानामिव चय इवोद्गाढतमसां घनानां भूमेव प्रचुरतरधूलीभर इव ।
तनुच्छायोद्गारच्छुरितहरिदन्तरतया समावृण्वन्नन्तर्बहिरपि हराम्यापदि जनम् ॥

मदः—

अहो मम महीयस्ता यन्मयाऽऽलिङ्गितो जनः । बुद्धतत्त्व इव स्वान्यान्पश्यन्नपि न पश्यति ॥

मत्सरः—

एषोऽस्मि हन्त परदूषणशीकरेण संप्लावयञ्जलधिरेव भुवं युगान्ते ।
सर्वातिशायिपरकीयगुणक्षमाभृद्-म्लोलिक्केलिकलनारसिकः स्वभावात् ॥ १८ ॥

कामः—भो भो भ्रातरः,

एकैकोऽप्यलमेव तावदचिराद्याचान्तमुद्भ्रान्तम-
प्याधातुं जगदप्रतीक्षितसहोत्साहोद्यमस्थेमतः ।
अन्योन्यं समवायिनां पुनरिहासाध्यं किमस्माकमि-
त्येतन्नूतनवन्न तावदधुना विज्ञापनीयं मया ॥ १९ ॥

परं तु भुवनेन्द्रजालशेवधेरज्ञानवर्मणो महाराजस्याज्ञाकरतायाः पक्षपातिताथाश्चानुरूपं प्रयतितव्यमस्माभिः ।

अन्ये—आदिश्यतामत्रभवता तादृशो यत्नः ।

कामः—सर्वैराकर्ण्यतां भ्रातृभिः,

मोहो मत्तद्विप इव भवत्वेष यन्ता भवामि क्रोधो लोभो मम परिकरो मत्सरोऽयं मदश्च ।
इत्थं भूत्वा षडपि च वयं जीवसंज्ञस्य राज्ञो भूयो दृष्टिप्रसरविषये भूविभागे चरामः ॥

ततश्च,

आलोक्य मोहनमनेकपसार्वभौममारोक्ष्यति क्षितिपतिः स कुतूहलेन ।

आरूढमात्रमथ तं वितथाभिलाषाशु क्षिपेम पुरुषे विषयान्धकूपे ॥ २१ ॥
क्षिप्तश्च तत्र स स्वैरं श्वीबस्तत्परतन्त्रितः । मुक्तिप्रासादनिश्रेणीं नारोहेच्चरमाश्रमम् ॥

अन्ये—अहो साधीयः संविधानकम् ।

मोहः—अथापि परिज्ञातास्मदीयदुर्व्यवसितो जीवानुचर इति शङ्कते मे हृदयम् ।

कामः—(सामर्षम्)

योगारूढोऽपि निःसङ्गोऽप्यस्माभिः सङ्गहेतुभिः ।
निपात्यते क्षणेनाधः कियानेष पृथग्जनः ॥ २३ ॥

भ्रातर्मोह, तदलमतिशङ्कया । संकल्पय तावदात्मानं गजरूपेण ।

मोहः—यथा रोचते ज्यायसे । (इति ध्यानं नाटयति ।)

कामः—अहो, संकल्पमात्रेण महानेष गजः संवृत्तः । तदहमप्यस्य स्कन्धमधिरुह्याधोरणभावमवलम्बे । (इति तथा करोति ।)

(परिशिष्टाश्चत्वारः परिवारभावेनावतिष्ठन्ते । कामः सपरिवारो गजेन परिक्रामति ।)

जीवः—(विलोक्य) अहो, गजो गजः ।

आपातबोधः—(विलोक्य, स्वगतम्) आः कष्टम् । आरब्धमनिर्मथातुमगतिभिः । (प्रकाशम्) देव, न परमार्थोऽयं गजः ।

जीवः—कथं मिथ्यैव ?

आपातबोधः—कः संदेहः ?

जीवः—(पुनर्निरूप्य) नन्वयं परमार्थ एव ।

आपातबोधः—मदीयो मिथ्यात्ववादः ।

जीवः—गरीयसी पुनरियमन्यथाप्रतिपत्तिः ।

आपातबोधः—बाढम् । कस्येति तु विवेचनीयम् ।

जीवः—व्यवहारविसंष्ठेऽर्थे किं वेदनायासेन ।

आपातबोधः—अयमपि निर्देशो देवमनुस्पृशन्न निवार्यते ।

जीवः—(निपुणं निर्वर्ण्य, स्वगतम्)

स्वयमयमुपपन्नः कात्स्न्र्यतो हस्तिधर्मैः स्फुटमनुभवपद्यामद्य नो गाहमानः ।
कुवलयितवनान्तः कोमलाभिः स्वभाभिः कथमपलपनीयः कुञ्जराणामधीशः ॥ २४ ॥

अतः परमार्थ एवायम् । नामधेयानुरूपः पुनरापातबोधस्य बोध इव व्यवहारोऽपि न विस्रम्भणीयः (प्रकाशम्) आपातबोध, भवतु गजो मिथ्या वा तथ्यो वा । सर्वथा तावदेतस्य दर्शनमात्रेण मम कुतूहलमुत्पद्यते । (पुनर्निरूप्य) कथमस्योपर्यारोहणोऽपि, परितः परिवारश्च ।

(कामः गजमुपनयति । आपातबोधः भयेन पलायितुमुपक्रमते ।)

जीवः—(आपातबोधं हस्तेन गृहीत्वा, सोपहासम्) आपातबोध, गजो मिथ्या; किं पलायसे ?

आपातबोधः—पलायनमपि मिथ्यैव ।

कामः—(अङ्कुशगर्भमञ्जलिं कुर्वन्) आयुष्मन् अत्रभवता सानुचरेणाधिरुह्य सनाथीक्रियतामेष गजराजः ।

जीवः—(स्वगतम्) प्रथममेवाहं कुतूहली । तदुपर्ययमपि प्रार्थयते । तदेनमधिरुह्यात्मानं विनोदयिष्यामि । (प्रकाशम्) आपातबोध, मिथ्यापलायन इव मिथ्यागजारोहणेऽपि भवान् प्रवर्तताम् ।

आपातबोधः—अनतिलङ्घनीयं नाम गजशासनम् ।

(कामः गजं नमयति । जीवः प्रथममापातबोधं गजमारोप्य स्वयमपि नाट्येन गजमधिरोहति ।)

आपातबोधः—(स्वगतम्) हा हन्त, अयमहमपि लम्भोऽस्मि मोहवागुरायाम् ।

जीवः—आपातबोध, अनेनैव गजयानेन तुर्याश्रमं प्रवेक्ष्यामि ।

आपातबोधः—अहमप्यन्धतमसे न रूपं द्रक्ष्यामि ।

जीवः—अलं वैतण्डिकत्वावलम्बनेन ।

आपातबोधः—एष मूकीभूतोऽस्मि ।

कामः—आयुष्मन्, यौवनवनस्याभ्यर्हितोऽयं विषयोद्देशो दर्शनीयः, तदत्र प्रवर्तयामि गजराजम् ।

जीवः—आधोरण, तुर्याश्रमं गन्तुमभिलषामि, यत्र मे वासो भविष्यति ।

कामः—किं नाम कुविन्दवाटिकप्राप्तिरभिलषिताऽऽयुष्मतः ?

जीवः—न हि न हि । चतुर्थाश्रमप्राप्तिः ।

कामः—चतुर्थ इत्यनेन किमेकजातिवर्णोऽभिप्रेयते ?

जीवः—कृतमन्यथाख्यात्या । चरमाश्रमं जिगमिषितोऽस्मि ।

कामः—हन्त प्रतिपन्नोऽस्मि । चरमाश्रमेण [illegible] । (इति गर्वं प्रधान्य नाट्येन पुरं प्रवेशयन्,) आयुष्मन् चरमाश्रमं प्राप्ता स्म ।

जीवः—(निरूप्य) अनृतवादिन्नाधोरण, पुरं खल्वेतत् ।

कामः—आयुष्मन्, नानृतमेतत् । अनेन पथा गच्छतामस्माकं प्राप्तप्रायश्चरमाश्रम इत्युच्यते ।

जीवः—भवतु । कस्येदं पुरं यस्य घण्टापथे वयं नर्तामहे ? किंनिमित्तश्च पौराणां संभ्रमः ?

कामः—नन्वायुष्मान् एव पुरत्रयस्वामिनः पुरमेतदध्यासनामकम् । व्यवहारनामाऽयं घण्टापथः । अत्र भवदागमनमहोत्सवप्रयुक्तश्च पौराणां संभ्रमः । तथा हि,

आसिक्ता घनसारवारिभिरितो व्याक्षिप्यमानाः पुन-
र्लक्ष्यन्ते विशिखा विकीर्णसुमनःसंभारमाध्वीरमैः ।
बध्यन्ते पथितः पुरं वणिमयप्रासादपङ्क्तिद्वय-
स्यूतानेकवितानतोरणगणैः [illegible]ताका अपि ॥ २५ ॥

अपि च, नीरन्ध्रे वियदन्तरं ध्वजपटीच्छत्रच्छटाकोटिभिः
पुष्पैरद्य निरन्तरा वसुमती कुन्दारविन्दादिभिः ।
प्रत्याशं पुरमेतदायतदृशामोघैरमोघीकृतं
संपूर्णे पटवासपांसुनिकरैरत्रोत्सवे गोत्रभी ॥ २६ ॥

अपि च, उद्गायन्ति कुशीलवास्तव पुरो गाथाः सुधाधारणीं
नृत्यन्त्यद्भुतरूपसंपद इतः संभूय वाराङ्गनाः ।
संघीभूय जनेन वन्दिन इतः संप्रस्तुवन्ति स्तुतिं
पौरा जानपदाश्च भो जय जयेत्याशीर्वचः कुर्वते ॥ २७ ॥

जीवः—(साहंकारावेशमुन्मस्तको वीरासनं विरचयन्) अहो अहम्, अहो अहम् ।

राजाऽहं जगतो युवाऽस्मि धनिको रूपेण कामाधिको
रम्भोरूनिवहैरहंप्रथमिकासंभावनीयाकृतिः ।
किं चाहं विदितोऽस्मि दिग्विजयतो निर्वैरितावींतलः
सर्वैश्वर्यसमुन्नतस्य धुरि मे चन्द्रः क्व चेन्द्रः क्व वा ॥ २८ ॥

[स्तम्भेन स्वयं नाटयन्स्थितः । ततः प्रविशन्ति दयाऽऽदयोऽष्टावात्मगुणाः ।]

दया—देवो वा दनुजोऽथ वाऽथ मनुजः कीटः पतङ्गोऽपि वा
यः कश्चिद्यदि दुःखपङ्कपतितः प्रत्युद्धराम्येव तम् ।

न ह्यागन्तुक एष किं तु विमलो नैसर्गिको मे गुण-
स्त्रातुं दुःखितजन्तुवर्गकरुणा जातोऽस्ति तेनानिशम् ॥ २९ ॥

क्षान्तिः—दुःखं नाम किमस्ति वस्तु महता यत्नेन यद्वार्यते
द्वन्द्वं चेद्व्यथयत्यलं व्यथयतु क्षन्तव्यमेतत्पुनः ।
क्षाम्यन्यत्सुखमश्नुते परिहरन्नाप्नोति तत्सर्वथा
सीदेत्प्रत्युत दुःखवानपरो विक्षेपिभिः साधनैः ॥ ३० ॥

अनसूया—आपन्मत्सरिणो जनस्य नियतं संपत्तदन्यस्य च
प्रत्यक्षं च विभाव्यते मतिमता स्वस्मिन्परस्मिन्नपि ।
इत्थं सत्यपि नान्यदोषविमुखा नान्योदयश्लाघिनो
लोका इत्ययमस्मदन्वयबहिर्भावस्य कोऽपि क्रमः ॥ ३१ ॥

अनायासः—भूयोभिर्मिलितैर्महोपकरणैर्यैः सुखसाध्नेहसा
दुःसाध्याः सुधियोऽपि कौशलभृता यत्नैर्विचित्रैरपि ।
आयासेन विना सिषाधयिषतस्तांस्तान्साधयन्तः क्रियाः
के तावन्मनुजग्रहेण गृहिणो नासन्कृतार्थीकृताः ॥ ३२ ॥

शौचनामा—अधीतस्वाध्यायोऽप्यविदिततदर्थोऽपि निपुणं
समर्थोऽप्यर्थी सन्नपि निरपवादोऽपि निगमे ।
मदुन्मेषाभावे कुहचिदपि कर्मण्यधिकृतः
कथं भावी वर्णत्रितयमनुगच्छन्नपि नरः ॥ ३३ ॥

मङ्गलशर्मा—इज्यादानतपःप्रधानमखिलश्रेयःप्रदानक्षमं
कर्म प्रारभमाण एव पुरुषो व्यावर्तमानः श्रमैः ।
प्रोत्साहीक्रियते न चेत्किल मया तत्तादृशा कर्मणा
सिद्धिं विन्दति किं प्ररोचितमतिः स्तुत्यर्थवादैरपि ॥ ३४ ॥

अकार्पण्यशर्मा—

कृच्छ्रेण क्षणशस्तथैव कणशो लुब्धेन संपादिता
प्राणेभ्योऽपि गरीयसी सकृदपि स्वेनोपयुक्ता न या ।
सा संपन्मम संगतिं गतवता तेनैव केनाप्यहो
पात्रेषु प्रतिपाद्यते तृणमिव द्राक्त्यज्यते भुज्यते ॥ ३५ ॥

अस्पृहा—ऐन्द्रं यत्पदमद्भुतं यदपि वा वैश्वं चमप्यूर्जितं
यश्च प्रार्थितदुर्लभस्तनुभृतां भोगस्तथोच्चावचः ।
एतत्तन्मदपाङ्गशीकरकलासंपातसंभावना-
निःशेषीकृतकौतुकस्य कृतिनः क्वापि क्षणे दृश्यताम् ॥ ३६ ॥

आपातबोधः—आः कष्टमतिभूमिं गतोऽहंकारावेशो देवस्य । तदत्र प्रतिबोधनमपि निष्फलं भविष्यति । अप्रतिबोधने च देवो दुर्विषयपरतन्त्रतया अयसो विषकुम्भेत । किमत्र कर्तुमुचितम् । (ऊर्ध्वमवलोक्य सहर्षम्) कथमार्यसौवलवर्णितमेवात्मगुणाष्टकम् । कथं पुनरेतेन देवः संगमयितव्यः । (विचिन्त्य) इत्थं नाम । आधोरण, देवस्य निदेशवर्तिना त्वया प्रासादस्यास्य समीपमुपनेतव्यो गजराजः, यद्दर्शनेन सफलं कुतूहलं देवस्य ।

(कामः तथा करोति । आपातबोधः आत्मगुणान्प्रति गीतिं करोति । आत्मगुणा वातायनद्वारा प्रासादमुपनिपत्यापातबोधेन सह जीवमुत्क्षिप्य पुनः प्रासादान्तरन्तर्हिताः ।)

कामः—आयुष्मन्, आधीयतामितो दृष्टिः ।

मांसानां पालिकेयं मधुरसभरिता कुम्भिकापङ्क्तिरेषा
संफुल्लन्मल्लिकादिप्रसवसरयुतश्चन्दनाद्रिद्रवोऽयम् ।
एषा योषामणीनां ततिरतिरुचिराकारनिर्धूतरम्भा
संभारोऽयं समग्रः समुदयमयते भोगसंपादकानाम् ॥ ३७ ॥

(परावृत्य पश्चाद्भागं पश्यन्, सोद्वेगं हस्तेन हस्तं निष्पिष्य) अहह प्रमादः ! न दृश्यते राजा ।

(निरूप्य सर्वे विषादं नाटयन्ति ।)

कामः—यावन्मांसकलङ्कमद्यसुतनुस्तोमस्रगालेपन
प्रालेयानिलचन्द्रिकादिविषयेष्वाधज्जयामो नृपम् ।
तावत्त्वाक्षिपता प्रभावपिहिताकारेण केनाप्यहो
दैवेन प्रतिपक्षमाशु विशता सर्वे वयं वञ्चिताः ॥ ३८ ॥

क्रोधः—(दन्तान्कटकटाप्य) कष्टं भोः कष्टम् ।

पराक्रान्तंमन्यैरविरलमसीभिः परिवृतः सुदूरादस्माभिः प्रसभमुपनीतो य इह सः ।
विषत्स्वेवास्मासु व्यवधिमवधानादभजदित्यसौ दुष्कीर्त्तिर्नः कुलमलिनतायै न किमहो ॥

लोभः—यमाकृष्टुं दुष्टे पथि विषयनामन्यनुचिते नितान्तं संभ्रान्ता वयमियदनेहःसमुदयम् ।
दुराधर्षो जातः स पुनरधुना जीवनृपतिस्ततो नः संरम्भः परिणमति भस्माहुतिरिव ॥

मदः—निःशङ्कं मधु पायय पललान्याहारयाधिकं
रामाः संगमयाथ घोरतमसि व्यापारयामाद्य तम् ।
इत्येवं बहुशो विकत्थनकृतां राज्ञः पुरस्तान्मदा-
दस्माकं प्रकटं हि पुंस्त्वमधुनेत्यन्तर्विलज्जे परम् ॥ ४१ ॥

मत्सरः—मोहो मोहमुपागतः समभवत्कामस्य कामः सुतः
क्रोधः क्रोधपदं मदो गतमदो निर्मत्सरो मत्सरः ।
लोभः सोऽयमपि प्रलोभनपदं जातो विधेरज्ञया
किं ब्रूमः किमिहोचितं कथमितो जीवेम लज्जां विना ॥ ४२ ॥

तदद्य निरुद्यमाः पुण्ये क्वचिदरण्ये मृगैः सह वसन्तः शेषमायुषोऽपनेष्यामः ।

कामः—अलमधीरतया । क गमिष्यति स तपस्वी जीवः ? प्रायश आपातबोधहतकेनापक्षिप्तोऽत्रैव क्वचिदन्तर्हितः स्यात् । तत्सर्वतो मृगयामहे ।

(सर्वे तथेति परिक्रम्य निष्क्रान्ताः ।)

जीवः—(समन्तादवलोक्य) अहो चरमाश्रमं प्राप्ताः स्मः, यदत्र काषायधारिणः संनिहिताः ।

आपातबोधः—देव, श्रमं प्राप्ताः स्मः; न पुनस्तमाश्रमम् ।

जीवः—कस्तर्ह्ययमुद्देशः ? के चैते काषायधारिणः ?

आपातबोधः—इदमभ्यन्तरं प्रासादस्य, एते चात्मगुणनामानो महात्मानः ।

चत्वारिंशत्प्रभेदा ये संस्कारास्तेष्वसत्स्वपि । यदालम्बनमात्रेण पुरुषो जायते कृती ॥

जीवः—(साश्चर्यम्) आपातबोध, कुत्र स्थिता वयम् ? कुत्रापतिता वर्तामहे ?

आपातबोधः—शृणोतु देवः ।

आकृष्य षड्भिररिभिर्विषयान्धकूपे प्रक्षिप्यमाणतनुरत्र भवानकाण्डे ।
आविर्भवद्भिरलमात्मगुणैरमीभिरध्यासितोऽस्युपनयद्भिरमुं प्रदेशम् ॥ ४४ ॥

जीवः—(सानुतापम्) आः कष्टमाः कष्टम । कथमेवमुपक्रान्तं दुर्दान्तैः । आपातबोध, तादात्विकत्वद्वचनानादरस्य विषरूपोऽयं विपाकः ।

आपातबोधः—देव, कृतं गतानुतापेन । वन्दनीयाः पुनरेते तपस्विनः ।

जीवः—आपातबोध, उदाहर णावदेतेषां प्रतिनियतान्यभिधानानि ।

आपातबोधः—(हस्तेन निर्दिशन्)

निरुपधि परदुःखच्छेदनेच्छा दयेयं विघटयति विपत्सु क्षान्तिरुद्वेगमेषा ।
परमहिमकथायां हर्षदैषाऽनसूया विषयविमुखतायाः कारणं त्वस्पृहेयम् ॥ ४५ ॥

अन्ये पुनः शौचमङ्गलाकार्पण्यानायासनामानश्चत्वारो नाम्नैव निगदव्याख्यातमहिमानः ।

जीवः—भो भो महाभागाः, नमो वः ।

आत्मगुणाः—राजन्, कल्याणभाजन भूयाः ।

जीवः—एकद्वित्रिसमन्वयेऽपि भवतां सालोक्यभाग्ब्रह्मणः
सायुज्यप्रणयी भवद्भिरखिलैरन्वीयमानो भवेत् ।
इत्येतच्छ्रुतिमात्रगोचरतया पूर्वं स्थितं संप्रति
त्वध्यक्षं समभून्ममेति किमितः कल्याणमाशास्यते ॥ ४६ ॥

आत्मगुणाः—राजन्, निष्कामकर्मनिष्ठेन त्वया संप्रति निराकृतमननुष्ठानलक्षणमप्रामाण्यं शास्त्रस्य ।

जीवः—

विषयकुहरात्प्रत्युद्धृत्य क्षणात्प्रतिरक्षतामुपकृतिपणेनात्मा क्रीतो मम स्वत एव वः ।
अथ कतमया निष्क्रीतः प्रत्युपक्रियया भवेत्स पुनरिति मे चिन्ताग्नस्य का गतिरुच्यताम् ॥

आत्मगुणाः—

त्वमसि जगतां निष्ठाकाष्ठा गतिश्च परायणं श्रुतिभिरुदितो भूयो गत्यन्तरं किमपेक्षसे ।
पुरुष भवतस्तत्तादृक्षस्य का नु परा गतेर्न खलु जलधेरन्या काचिद्गतिः सरितां निधेः ॥

(नेपथ्ये कलकलानन्तरम्)

भो भो दुरात्मन्नात्मज्ञ, मायाश्रबलितविध्यऽहंकारकबलित, मृषारोपितपौरुष, सर्वगुणावभूतचिदाभास, जीवापशद,

उत्क्षिप्तोऽसि किल द्विपाच्छ्रुतरं व्याक्षिप्तचित्तेष्वमी-
ष्वन्तर्धानगतेन केनचिदपि प्रद्वेषिणा भीरुणा ।
अद्य त्वां मिषतोऽपि तस्य पुरतः प्रत्याहरामो वयं
श्येना मीनमिवात्र कश्चिदपि चेच्छक्तः परित्रायताम् ॥ ४९ ॥

[सर्वे आकर्णयन्ति ।]

आत्मगुणाः—हन्त, नूनमन्तर्हितं राजानमुपलभ्य पुनरप्यास्कन्दितुकामानां कामादीनामदीनो व्यवहारः । तदितः परं नोदासितव्यमस्माभिः । आपातबोध, त्वमस्मदनुज्ञया नाविदूरवर्तिनं तुर्याश्रमं प्रापय राजानम् । वयं त्वरिवर्गं समूलमुन्मूलयिष्यामः ।

आपातबोधः—यदाज्ञापयन्ति महाभागाः ।

जीवः—अनुगृहीतोऽस्मि । (इति यथाक्रमं परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति तृतीयोऽङ्कः ।

॥ चतुर्थोऽङ्कः ॥

॥ मिश्रविष्कम्भः ॥

(ततः प्रविशति परिव्राजिकावेषा साधनसंपत्तिः ।)

साधनसंपत्तिः—नित्यानित्यविवेचनं मम मुखं दृष्टिर्विरागोदयः
श्रद्धाशान्तिदमक्षमोपरतयो गात्रं मुमुक्षा शिरः ।
ये चान्ये स्युरमानिताप्रभृतयो मैत्र्यादयो वा गुणा-
स्ते सर्वेऽपि मम प्रसाधनविधावन्तर्भवन्ति स्वतः ॥ १ ॥

(परिक्रम्यावलोक्य च) कथमिह एवाभिवर्तते सत्त्वशुद्धिः ।

(प्रविश्य)

सत्त्वशुद्धिः—हला साहणसम्पत्ती, किं चिराअसि ? [हला साधनसंपत्ते, किं चिरायसि ?]

साधन०—इत आगताऽस्मि ।

सत्त्वशुद्धिः—इत्तिअं कालं को विलम्बो ? [इयन्तं कालं को विलम्बः ?]

साधन०—अद्य खलु सुप्रतिष्ठाऽस्मि कामादिवैरिजयेन ।

सत्त्वशुद्धिः—हला, एहि गच्छम्मो । [हला, एहि गच्छामः ।]

साधन०—क्व पुनः ?

सत्त्वशुद्धिः—देवीए सण्णिहाणे । [देव्याः संनिधाने ।]

साधन०—किं तत्र गता ब्रह्मजिज्ञासा ?

सत्त्वशुद्धिः—ण खु ण खु । [न खलु न खलु ।]

साधन०—किं तस्या गमनविलम्बे कारणम् ?

सत्त्वशुद्धिः—किं अण्णं भेददिट्ठिए णिब्बन्धवन्दरेण । [किमन्यद्भेददृष्टेर्निर्बन्धमन्तरेण ।]

साधन०—किं मा या द्वैतवादस्य संदेशहारिणी ?

सत्त्वशुद्धिः—अह इं । [अथ किम् ।]

साधन०—कीदृशः स देशो ब्रह्मजिज्ञासां प्रति द्वैतवादस्य ?

सत्त्वशुद्धिः—गुणवदो एव्व पक्खो मए अवलम्बिअदि ण णिग्गुणो पक्खो त्ति । [गुणवत एव पक्षस्त्वयाऽवलम्बनीयो न निर्गुणपक्ष इति]

साधन०—सदृशमेवेदं तस्याज्ञानवर्मोपप्लवकृतेः । किं पुनः प्रतिबंदिष्टं द्वैतवादं प्रति ब्रह्मजिज्ञासया ?

सत्त्वशुद्धिः—गुणवदो एव्व पक्खो मए अवलम्बिअदि ण णिग्गुणो पक्खो त्ति । [गुणवत एव पक्षो मयाऽवलम्ब्यते न निर्गुणः पक्ष इति ।]

साधन०—कथमेवमध्यवस्यसि ब्रह्मजिज्ञासा । अत एव तस्या निकटेऽहं प्रेषिताऽस्म्यमात्य-रमणीयचरणेन ।

सत्त्वशुद्धिः—कहिं दाणिं तादो ? [कुत्रेदानीं तातः ?]

साधन०—मामितः प्रस्थाप्यार्यमिश्रं शिवप्रसादाकारयितुं गतः ।

सत्त्वशुद्धिः—को उण दाणिं देवस्स परिस्सरे ? [कः पुनरिदानीं देवस्य परिसरे?)

साधन०—आपातबोधः ।

सत्त्वशुद्धिः—अहं वि देवीए पस्सवट्ठिणी होमि । एआइणी णाम सा । [अहमपि देव्याः पार्श्ववर्तिनी भवामि । एकाकिनी नाम सा ।)

साधन०—भवितव्यतया संगता देवी । त्वया पुनर्देशिकानुग्रह आह्वयितव्यः । अहमपि ब्रह्म-जिज्ञासां पुरस्कृत्य तुर्याश्रमस्थं देवं संभावयिष्यामि ।

[इति परिक्रम्य निष्क्रान्ते ।]

इति मिश्रविष्कम्भः ॥

(ततः प्रविशति जीवः, आपातबोधश्च ।)

जीवः—अहो निर्विघ्नेपरमणीयता तुर्याश्रमस्य । तथा हि,

न कर्तव्यं किंचिज्जगति परिहर्तव्यमथ वा वने वास्तव्यानामिह सकलभूतप्रणयिनाम् ।

क्रियाभ्यः सर्वाभ्यः प्रतिकलविवृद्धानुरागदुपालीढं नैर्घृण्यं निरवधिकमासादितवताम् ॥

आपातबोधः—इहापि न हीयते कर्तव्यम् ।

आचार्योक्तिरसिद्धं प्रतिपदविहितं ब्रह्मचर्यं च कार्यं
मर्यादाः सेवितव्या यमनियमनिभा नो विचारणाध्यानमुख्याः ।
निष्ठातव्यं समाधावहरहरपि च द्विप्रकारेऽपि तस्मि-
न्कामादीनां त्यागप्रकरणविरहव्यञ्जनैर्न प्रबन्धः ॥ ३ ॥

जीवः—सत्यमस्त्येवात्र कर्तव्यम् , तथाऽपि तत्र म्रियतामनुस्मरणस्य प्रत्यनीकम् । **श्रेयस्तान्त्रिकब्रह्म-साधनमेव** । यतः,

प्राणान्पञ्च नियम्य तं च करणग्रामं निगृह्य क्षणं
प्रत्याहृत्य मनः परात्मविषयतो यावत्समाधीयते ।
तावत्पादझलज्झलायितरणत्क्षीरभृङ्गाङ्गना
बाला किंचिदुदञ्चितस्मितमुखी क्षिप्तेव समोज्जृम्भते ॥ ४ ॥

अपि च,

अनुकलमपि ध्यायं ध्यायं तदाकृतिमद्भुतां मनसि भजतो निर्व्यूढा मे तदाहितसंस्क्रियाम् ।
स्फुरति पुरतः पश्चादेषा वधूरव पार्श्वयोर्युगपदधुना भूयश्चान्तर्बहिश्च सुनिश्चितम् ॥

आपातबोधः—संप्रति संततानुसंधानेन तन्मयत्वं प्राप्तो देव इति मन्ये ।

जीवः—अत्यल्पमिदमुच्यते ।

ध्यायंस्तामनुवेलमुज्झितमनोबाह्येन्द्रियप्रक्रियः
सद्यस्तन्मयतां न केवलमहं प्राप्तोऽस्मि निःसंशयम् ।
मद्दृष्ट्या तु समस्तमेव भुवनं संपद्यते तन्मयं
निह्नोतुं विधिना विनैतदधुना शक्यं जगच्छिल्पिना ॥ ५ ॥

आपातबोधः—संप्रत्याप्तकाम एव देव इति मन्ये यत आत्मकामः ।

जीवः—सत्यमेवमन्यथाप्रतिभानं तव वर्तते ।

आपातबोधः—तत्कदा निवर्तिष्यते ?

जीवः—

यदा मा तन्वङ्गी पुनरपि पुरेव स्फुटतरं पुरः प्रादुर्भावं सपदि भजमाना कुतुकतः ।
स्वलावण्योल्लासव्यतिकरपराभूततिमिरा चिराद्युत्सङ्गं मे फलितनिजमङ्गं विरचयेत् ॥ ७ ॥

आपातबोधः—कथमेतद्भविष्यते, यतोऽद्याप्यनिवृत्तकोपैव देवी ।

जीवः—बाढमेनामनुसरिष्यामि । (उभौ परिक्रामतः ।)

जीवः—आपातबोध, भवितव्यतया सह किमपि व्यवहरन्ती इत एवाभिवर्तते देवी । तदावां विटपान्तरितौ शृणुवस्तावदेनयोर्विस्रम्भजल्पितानि । [उभौ तथा कुरुत :।]

[ततः प्रविशति बुद्धिः, भवितव्यता च।]

भवितव्यता—देवि, पसीद । कुदो विसण्णा सि [देवि, प्रसीद । कुतो विषण्णाऽसि]

बुद्धिः—हला भविदव्वदे, तुमं किं वि अजाणदी विअ पुच्छसि । जं दाणिं देव्वो, [हला भवितव्यते, त्वं किमप्यजानतीव पृच्छसि । यदिदानीं दैवः,] (संस्कृतमाश्रित्य)

नालापेऽभिरुचिं करोति न पुनः स्रक्चन्दनादिस्पृहां
दूरे नाम विलासिनीकुलसमाचारो विचारोदयात् ।
ताम्बूलश्रवणेऽपि कुप्यति भृशं न स्वीकरोत्यम्बरं
प्राश्नात्यौषधवत्कदाचिदशनं क्लिश्नाति मां केवलम् ॥ ८ ॥

भवितव्यता—कदारहिअ ? [कदाऽऽरभ्य ?]

बुद्धिः—जदा उण मण्णासणामा एसो अस्समो पत्तो मइ कोवेण तदप्पहुदि एसा अवत्था अज्जउत्तस्स । [यदा पुनः संन्यासनामैष आश्रमः प्राप्तो मयि कोपेन तदाप्रभृत्येषाऽवस्थाऽऽर्यपुत्रस्य]

भवितव्यता—किंणिमित्तो तुइ कोवो देवस्स ? (किंनिमित्तस्त्वयि कोपो दैवस्य ?)

बुद्धिः—जदो कोवाविट्ठा अहं दुट्ठजादि अज्जउत्तस्स बहुप्पआरं अणुणअं ण गहीदवदी । [यतः कोपाविष्टाऽहं दुष्टजातिरार्यपुत्रस्य बहुप्रकारमनुनयं न गृहीतवती ।]

भवितव्यता—कुदो उण तुह तारिसो कोवावेसो देवम्मि ? [कुतः पुनस्तव तादृशः कोपावेशो दैवे ?]

बुद्धिः—सुणादु सही । पुढमं कहिं वि इत्थिअअणम्मि अज्जउत्तस्स भाववन्धो त्ति कण्णाकण्णि-

आए सुदं । अणन्दरं दु एक्कदा अज्जउत्तस्स अग्गदो एव्व दिट्ठा मए सा चित्तफलअम्मि । [श्रृणोतु सखी । प्रथम कुत्रापि खीजन आर्यपुत्रस्य भावबन्ध इति कर्णाकर्णिकया श्रुतम् । अनन्तरं त्वेकदाऽऽर्यपुत्रस्याग्रत एव दृष्टा मया सा चित्रफलके ।]

भवितव्यता—कहिं दाणिं तं चित्तफलअं ? [कुत्रेदानीं तच्चित्रफलकम् ?]

बुद्धिः—इदो एव्व तं [इत एव तत्] (इति चेलान्ते पिहित चित्रफलकं प्रदर्शयति । **भवितव्यता** चित्रफलकमादाय निरूप्य च सरोमाञ्चमानन्दबाष्पं मुञ्चति ।)

जीवः—आपातबोध, चित्रदर्शनमात्रेण रोमाञ्चानन्दबाष्पोद्गमाद्भवितव्यतायाः परिचिता तत्रभवतीति मे वितर्कः ।

बुद्धिः—(स्वगतम्) कहं एसा चित्तदंसणादो अस्सूणि मुञ्चेदि । णूणं चित्तगदा वहू एदाए अणुबन्धिणी होदि । [कथमेषा चित्रदर्शनादश्रूणि मुञ्चति । नूनं चित्रगता बधूरेतस्या अनुबन्धिनी भवेत] (प्रकाशम्) भविदव्वदे, किं कारणं बाहुग्गमस्स ? [भावितव्यते, किं कारणं बाष्पोद्गमस्य ?]

जीवः—अस्माभिः प्रष्टव्यं स्वयमेव देवी पृष्टवती । भवतु, किं वक्ष्यत्येषा, श्रोष्यामः ।

[भवितव्यता आनन्देन स्तिमिता तिष्ठति ।]

बुद्धिः—णं भविदव्वदे, पुच्छम्मि, दाव बाहकारणं । [ननु भवितव्यते, पृच्छामि तावद्बाष्पकारणम्]

भवितव्यता—देवि, किं कहइस्सं । खादिरमूलम्मि कविट्ठफललाहो, वराडिअण्णेसणप्पउत्तस्स णिहिलाहो, जं दाणिं चित्तदंसणप्पउत्ताए मह जदुच्छाए चिरणट्ठं पिअदमं वत्थु उवलद्धं, जं अण्णिज्जन्तं वि ण लहिज्जइ तिहुअणम्मि । सम्पदं किदइच्चो दाव देवो भुवणब्भुदे अस्सिं भावं उवणिबद्धन्तो । तदणुबन्धेण तुमं वि धण्णा एव । तुह अणुबन्धेण अणुबन्धिणो वि । [देवि, किं कथयिष्यामि । खादिरमूले कपित्थफललाभः, वराटिकान्वेषणप्रवृत्तस्य निधिलाभः, यदिदानीं चित्रदर्शनप्रवृत्ताया मम यदृच्छया चिरनष्टं प्रियतमं वस्तूपलब्धम्, यदन्विष्यमाणमपि न लभ्यते त्रिभुवने । सांप्रतं कृतकृत्यस्तावदेवो भुवनाद्भुतेऽस्मिन्भावमुपनिबध्नन् । तदनुबन्धेन त्वमपि धन्यैव । तवानुबन्धेनानुबन्धिनोऽपि ।

बुद्धिः—(साश्चर्यम्) भविदव्वदे, कहेहि कहेहि का उण एसा महाभाआ । [भवितव्यते, कथय कथय, का पुनरेषा महाभागा ।] (जीवः साकूतं कर्णं ददाति ।)

भवितव्यता—(सरोमाञ्चं संस्कृतमाश्रित्य)

सर्वे वेदा यत्पदं संगिरन्ते सर्वाण्येवाचक्षते यां तपांसि ।

यामिच्छन्तो ब्रह्मचर्यं चरन्ति प्राज्ञा जीवन्मुक्तिरेषा सखी मे ॥ ९ ॥

बुद्धिः—अज्ज प्पहुदि मह वि एसा सही एव्व । [अद्यप्रभृति ममाप्येषा सख्येव ।]

भवितव्यता—दिढप्पडिण्णा होहि । [दृढप्रतिज्ञा भव ।]

जीवः—यामासाद्य पुमान्न पश्यति परं नान्यद्विजानाति चे-

त्याहुः सर्वविदः पुरातनमिरामन्तःप्रदेशाध्वगाः ।

जीवन्मुक्तिरिति प्रथामुपगता वैद्येयमाजानतो

भूमानन्दमुर्याति निश्चितुहे मोदाहे चान्तरः । १० ॥

बुद्धिः—(साश्चर्यम्) णाम वि मे ण सुदपुव्वं एदाए । [नामापि मे न श्रुतपूर्वमेतस्याः ।]

भवितव्यता—(संस्कृतमाश्रित्य)

नैषा लभ्या श्रोतुमप्यस्मदादेः श्रृण्वन्नोऽपि प्राणिनो यां न विद्युः ।

आश्चर्योऽस्याः किं च वक्ताऽऽशिष्टो बोद्धा लब्धा त्वास्पदं कौशलस्य ॥ ११ ॥

बुद्धिः—वण्णअदु एसा पुणो वि सुणिस्सं । [वर्ण्यतामेषा पुनरपि, श्रोष्यामि ।]

भवितव्यता—(संस्कृतमाश्रित्य)

यामप्राप्य निवर्तन्ते वाचोऽपि मनसा सह । चिदानन्दाकृतिः सेयं वर्णनीया कथं मया ॥

जीवः—एष भूतार्थवाद एव ।

गन्तुं तत्पदमुद्यता सुमहता यत्नेन वाग्गुम्भना

व्यावृत्ता दृशुक्त्यभावजनितक्लेशेन निर्विद्यते ।

सिद्धानां यमिनां मनांस्यपि तदा प्रबोधयन्ती क्षणा-

त्प्रत्यावृत्य पुनः पुनः कलवशाद्विकल्प्यमुद्बिभ्रति ॥ १२ ॥

बुद्धिः—चिट्ठदु दाव ताए वण्णणं । कस्स उण एसा कण्णा ? [तिष्ठतु तावत्तस्या वर्णनम् । कस्य पुनरेषा कन्या ?]

जीवः—उचितः प्रश्नः ।

भवितव्यता—अओणिआ, अओ एव्व णिच्चसिद्धा अ । [अयोनिजा, अत एव नित्यसिद्धा च ।]

जीवः—प्राचीनो मदीयस्तर्कः संप्रति निर्णयः संपन्नः ।

बुद्धिः—कहिं उण एसा पडिट्ठिदा ? [कुत्र पुनरेषा प्रतिष्ठिता ?]

भवितव्यता—गुहब्भन्दरम्मि । [गुहाऽभ्यन्तरे ।]

जीवः—आपातबोध, गुहाऽभ्यन्तरे इत्येष तव संवादः ।

बुद्धिः—गुहप्पविट्ठा सा केण दट्ठव्वा । [गुहाप्रविष्टा सा केन द्रष्टव्या ?]

भवितव्यता—अग्गिआए तुए एव्व । [अग्र्यया त्वयैव ।]

बुद्धिः—कदा उण अग्गिआ भविस्सम् ? [कदा पुनरग्र्या भविष्यामि ?]

भवितव्यता—जदा उण सही साहणसम्पत्ती बम्हजिण्णासा अ तुए सङ्गदाओ भविस्सन्ति ।
[यदा पुनः सखी साधनसंपत्तिर्ब्रह्मजिज्ञासा च त्वया संगते भविष्यतः ।]

(ततः प्रविशति परिव्राजिकावेषेण साधनसंपत्तिः, ब्रह्मजिज्ञासा च ।)

साधन०—सर्वैः कर्मार्जितो यथेह भुवने भावः क्षयेणान्वित-
स्तद्वत्पुण्यजितोऽप्यमुत्र भुवने क्षीयेत भावोऽखिलः ।
उत्पत्त्याप्तिविकारसंस्कृतिमतः साध्यात्पृथग्लक्षणं
बुद्धिह्रासविवर्जितं पदमतः प्रेक्षावता प्रार्थ्यते ॥ १४ ॥

जिज्ञासा—श्रोतव्यं श्रुतिवाक्यतः श्रुतमिदं मन्तव्यमन्ताश्चिरं
युक्त्योघेन मतं च तत्प्रविशदं कार्यं निदिध्यासनैः ।
साक्षात्कार्यमिदं तदेव ह्यनकैरात्मस्वरूपं परं
तन्निष्ठा परिनिष्ठिता समुपगन्तव्या मुमुक्षावता ॥ १५ ॥

साधन०—हला जिज्ञासे, कुत इयन्तं कालं कृतविलम्बाऽसि ।

जिज्ञासा—त्वदागमनप्रतीक्षया ।

साधन०—ईदृशो मयि स्नेहातिरेकः प्रियसख्याः ।

जिज्ञासा—मुखं खल्वत्रभवती ।

साधन०—कृतमुपचारेण । भूतार्थं ब्रूहि । मया तु श्रुतं भेददृष्टयवष्टम्भो गमनविलम्बे निमित्त-मिति ।

जिज्ञासा—(कर्णौ पिधाय) क्षान्तं पापम् । क्षान्तं पापम् ।

भेददृष्टिमवष्टभ्य चेष्टते यो विनष्टधीः । मृत्योः स मृत्युमाप्नोति संदेहो नेह कश्चन ॥

साधन०—हला, किं कुप्यसि। द्वैतवादसंदेशाभ्युपगम एव भेददृष्टयवष्टम्भो नाम।

जिज्ञासा—किं नाम द्वैतवादस्य संदेशो मयाऽभ्युपगतः।

साधन०—अहं न जानामि। गुणवत्पक्षस्त्वयाऽवलम्बनीय इति संदेशः। गुणवत्पक्ष एव मयाऽवलम्ब्यत इति प्रतिसंदेशः। किमत्र फलितम्, त्वयैव विमृश्यताम्।

जिज्ञासा—अस्त्येव महानर्थभेदः संदेशप्रतिसंदेशयोस्तात्पर्यभेदेन।

साधन०—कथम्?

जिज्ञासा—गुणवतः पक्षोऽवलम्बनीय इति संदेशस्याशयः। गुणवान्पक्षोऽवलम्ब्यत इति प्रतिसंदेशस्याभिप्रायः।

साधन०—कस्मादत्पक्षो गुणवानभिप्रेतः प्रियसख्या?

जिज्ञासा—अद्वैतपक्ष एव।

साधन०—द्वैतपक्षे किं दूषणम्?

जिज्ञासा—अप्रामाणिकत्वमेव।

साधन०—सर्वानुभवसिद्धं द्वैतं कथमप्रामाणिकम्?

जिज्ञासा—श्रुतिप्रमाणकं न भवतीति ब्रवीमि।

साधन०—श्रुतयोऽपि द्वैतं वदन्ति।

जिज्ञासा—अनुवदन्तीति वक्तव्यं, यतो वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यम्।

साधन०—किमयं प्रतिसंदेशाभिप्रायो भेददृष्टिर्विदितः स्यात्।

जिज्ञासा—विदित इत्येव मे वितर्कः। कथमन्यथा प्रतिनिवर्तमानायास्तस्या वीरवादः।

साधन०—कथमिव।

जिज्ञासा—सर्वथा मत्पक्षे त्वां पातयिष्यामीति।

साधन०—अत्याहितम्।

जिज्ञासा—अभयं प्राप्ताया मम का भयशङ्का। (उभे परिक्रामतः।)

बुद्धिर्भवितव्यता च—(निरूप्य) कहं इदो एव्व आअच्छन्दि भअवदीओ। [कथमित एवागच्छतो भगवत्यौ] (इत्युपसरतः।)

बुद्धिः—भअवदीओ, पणमामि। [भगवत्यौ, प्रणमामि।]

भगवत्यौ—भर्तुरनुरोधिनी भव।

जीवः—कथमुपस्थिते भगवत्यौ । (इत्यापातबोधेन सहोपसृत्य) अयमहम् । (इत्यभिवादयते ।

भगवत्यौ—प्रियतमाभिसंपन्नो भव ।

जीवः—जातप्रायैव मे प्रियतमाऽभिसंपत्तिर्भगवत्योरुपस्थानेन ।

आपातबोधः—अनुकूलयितव्या देवी भगवतीभ्याम् ।

भगवत्यौ—यदर्थस्तावदावयोरुपक्रमः ।

साधन०—देवि, श्रूयताम् ।

अन्योन्यात्मकतामुपागतवतोरेतावताऽनेहसा
वैरस्यं युवयोर्न सांप्रतमिदं निष्कारणोज्जृम्भितम् ।
वैरस्यं पुनरेतदेव विषयेष्वस्थायिषु ब्रह्मणो
लोकान्तेषु निधीयते यदि तदा शोभाऽऽवहं याति नः ॥ १ ॥

(बुद्धिः अवचना तिष्ठति ।)

भवितव्यता—देवि, किं त्वं तूष्णीकासि ? [देवि, किं त्वं तूष्णीकाऽसि ?]

बुद्धिः—(संस्कृतमाश्रित्य)

संसारोऽयमनादिरेव विशयोऽप्यत्राणुमात्रो न नः
कालेन त्वियताऽपि नास्मि विरहव्याधेरहं गोचरे ।
अद्यैनं विधिदुर्विपाकविभवादुद्भाव्यमानोदयं
पर्यालोच्य विपच्यमानहृदया न व्याहरामि ह्रिया ॥ १८ ॥

जिज्ञासा—

भुक्ता भोगाः प्रतिमुहुरिहामुत्र चालं युवाभ्यां नानारूपा नवनवसमुन्मेषभाजोऽभिरूपाः ।
भोक्तव्यं किं भुवि परमितः शिष्यतेऽभुक्तपूर्वं निर्वेदस्य त्वयमवसरो निर्व्यलीकं निवेष्टुम् ॥

बुद्धिः—मं एव्व उद्दिसइ भअवदीणं संरम्भो । [मामेवोद्दिशति भगवत्योः संरम्भः ।]

साधन०—

स्वयमखिलविकारप्रत्ययप्रत्यगात्मा न हि विषयसुखार्थी लक्ष्यते पार्थिवोऽयम् ।
अपि तु चिरवियुक्तामात्मनोऽनन्यभूतामभिलषति स जीवन्मुक्तिमत्यन्तभव्याम् ॥ २० ॥

देवस्यानन्यभूता चैषा देव्या अप्यनन्यभूतैव ।

बुद्धिः—कहं ! [कथम् !]

साधन०—देवि, शृणु ।

त्वं देवान्न हि भिद्यसे स च पुनर्देवो न मुक्तेः पृथ-
ग्भावीति प्रणिधानतो मम दृढं विज्ञातमन्तः स्वयम् ।
एवं त्वं तदभेदमाश्रितवतो देवान्न भिन्नाऽसि य-
त्तन्मुक्तेरपि नैव भिद्यस इति न्यायेन निर्णीयते ॥ २१ ॥

जिज्ञासा—एतस्यामभिलाषबन्धनमपि प्रायेण न त्वां विना
देवस्य त्वदधीन एव भविता भोगो भविष्यन्नपि ।
संप्राप्ता यदि सामरस्यपदवीं भिद्येत किं वां तदा
सर्वोऽप्येष मृषा विशेषकलनायासश्रमया संगतौ ॥ २२ ॥

भवितव्यता—हला देवि, जीवम्मुत्तीए सङ्गदो देवो पज्जत्तकामदाए सत्थो हवे । तुमं वि दाणिं णिव्वक्खेपसुत्थदाए संप्पदं मुत्तिं अणुभविस्सासि । आरोविदा अ सा सहीपदं पुढमं एव्व तुए । ता अज्ज तुमं एव्व जीवम्मुत्तिं सुघडिदं करेहि देवेण । [हला देवि, जीवन्मुक्त्या संगतो देवः पर्याप्तकामतया स्वस्थो भवेत् । त्वमपीदानीं निर्व्याक्षेपसुस्थतया संततां सुप्तिमनुभविष्यसि । आरोपिता च सा सखीपदं प्रथममेव त्वया । तस्मादद्य त्वमेव जीवन्मुक्तिं सुघटितां कुरु देवेन ।]

बुद्धिः—ण सक्कुणोमि भविदव्वदं अदिवट्टिदुं । [न शक्नोमि भवितव्यतामतिवर्तितुम् ।]

(संस्कृतमाश्रित्य)

हितमस्त्वहितं वाऽस्तु वस्तुतत्त्वं न चिन्तये । आर्यपुत्रस्य कार्येऽस्मिन्नात्मानमपि नादृिये ॥

जीवः—(सपरितोषम्) दिष्ट्या देवी परित्यक्तमत्सरा मनोरथानुरोधिनी च संवृत्ता ।

भगवत्यौ—तर्हि प्रवर्तनां देवी कल्याणाय देवस्य ।

बुद्धिः—अहं इदो एव्व पउट्टम्हि । पुरदो चलिदव्वं अज्जउत्तेण । [अहमित एव प्रवृत्ताऽस्मि । पुरतश्चलितव्यमार्यपुत्रेण ।]

आपातबोधः—देव, किं जोषमास्यते । साधयामः ।

जीवः—अपि परिचितः पन्थाः प्रियाऽऽवसथस्य ।

आपातबोधः—हन्त, ममापि द्रष्टव्यः पन्थाः ।

जीवः—बाढम्, इदानीमेवमभिधत्से।

आपातबोधः—पश्चादपन्थानमेव प्रापयिष्यसीति वाक्यशेषः। भवतु, किमिदानीं कथितेन। अग्रे सर्वं स्फुटीभविष्यति। विस्रब्धमुत्तिष्ठतु देवः।

जीवः—ओं तत्सत्। (इत्युत्तिष्ठति।)

आपातबोधः—(अवलम्बनाय हस्तमर्पयित्वा) इत इतो देवः।

(सर्वे परिक्रामन्ति।)

आपातबोधः—सत्वरं चलतु देवो यावन्नभो न प्रवहति। अद्य हि,

परुषपरिकरोपसर्गदुःखैः परिणतसौम्यगुणैकदर्शनीयः।
विषयविलसितं विहाय सद्यः जगदुपयाति रविर्यथैष देवः॥ २४॥

जीवः—(ऊर्ध्वमवलोक्य, साश्चर्यम्)

अस्तं गच्छति मध्य एव नभसो ग्रस्तो रविः केन वा
स्तीर्यन्ते परितो जगन्ति तिमिरैरन्धीक्रियन्ते दिशः।
हा हा कोऽयमकाण्ड एव जगतामाविर्भवत्यत्ययो
यद्वा कस्यचिदिन्द्रजालरचनाप्रस्तावनैषा भवेत्॥ २५॥

अहं तु,

उद्बोधितोऽपि कबले कबले जनन्या निद्रालसः शिशुरिवाविदितान्यभावः।
आलोकयन्नपि बहिर्जगदिन्द्रजालमन्तः कयाऽपि कलया न परिच्युतोऽस्मि॥ २६॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे।)

इति चतुर्थोऽङ्कः॥



पञ्चमोऽङ्कः ॥

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति शिवप्रसादः ।)

शिवप्रसादः—अहो दयालुभावो भगवतः परमशिवस्य । तथा हि,

अल्पायुर्द्रविणोऽप्यनिष्टवसुधाखण्डाधिकारी नृपो
राजाऽस्मीति वदन्तमन्तिकगतं हन्ति क्षुधा सान्वयम् ।
विश्वेशोऽपि शिवः शिवोऽहमिति यो वाचाऽपि संभाषते
तस्मै देहभृते ददाति मुदितस्तादात्म्यमेवात्मनः ॥ १ ॥

किं बहुना,

आत्मोद्देशकृतान्यनेन सुकृतान्यद्येति जीवाह्वये
गाङ्गे प्रीतमनाः स्वनामकथनव्यापारनिस्तन्द्रिते ।
स्वं तादात्म्यमपि प्रदातुमधुना भावेन संकल्पय-
न्सर्वस्मिन्स्तदुपायसाधनविधावाज्ञाप्य मां प्राहिणोत् ॥ २ ॥

(परिक्रम्यावलोक्य च) कथमित एवाभिवर्तते सखा देशिकानुग्रहः । (उपसृत्य) सखेऽनुग्रह, कुतः संभ्रान्त इवासि ?

(प्रविश्य)

अनुग्रहः—कथमेवंविधो न स्याम् । यतो जीवन्मुक्तिकल्याणमुद्दिश्य प्रस्थितस्य जीवराजस्य प्रवृत्तिरपि नोपलभ्यते, यदभ्युदये प्रवृत्तोऽस्मि देशिकनिदेशेन ।

शिव०—सखे, पर्यवस्थापयात्मानम् । कुशली नाम स राजा जीवितमात्रेण ।

अनुग्रहः—जीवितमात्रेणेति कम्पितमिव मे सबन्धनं हृदयम् । सखे, स किं विपन्नो राजा ?

शिव०—

स बद्धो मोहाख्यप्रबलतरपाशेन विवशं सुदुर्मोचद्वैतान्धतममजठरीनिपतितः ।
समन्तादाक्रन्दन्हर हर हरेत्यातुरतया भवाख्ये गर्तेऽस्मिन्युगमिव निमेषं गमयति ॥ ३ ॥

अनुग्रहः—आः कष्टम् । इतोऽपि का नाम विपत्तिः । (सवितर्कम्) प्रायशः सर्वज्ञंमन्यस्यापतबोधस्यासमीक्ष्यकारितामुक्तोऽयमातङ्कः । अथ वा द्वैतवादोपलब्धाया भेददृष्टेर्दुश्चेष्टितमेतद्भवेत् ।

शिव०—अज्ञानवर्मण एव दुरात्मनो दुश्चेष्टितमेतदिन्द्रजालरूपम । अतश्च तदुन्मथनेन विना न क्षेमप्राप्तिर्जीवराजस्य ।

अनुग्रहः—कथमुन्मथितव्योऽनिर्वचनीयः स पापः ।

शिव०—सखे विस्रब्धो भव ।

नौस्तम्भाग्रनिविष्टकाकवदसावात्मैकनीडः क्व वा
यावद्वाप्यथ वाऽयनाय किमहो मार्गान्तरं विद्यते ।
यत्र क्वापि निलीनमप्यथ बलादासाद्य चाबध्य च
ब्रह्मज्योतिषि तं जुहोमि सहसाऽध्वर्युर्यथाऽग्नौ पशुम् ॥ ४ ॥

नियुक्तश्च मया द्वैतवादजयाय ब्रह्मज्योतिरुज्ज्वलनाय च मननिदिध्यासनशर्मभ्यां सह श्रवणशर्मा ।

अनुग्रहः—तर्ह्यहमपि सत्वरमितो गत्वा विपन्नं राजानमाश्वासयामि ।

शिव०—उपपन्नं भवानाह । यावदहमप्यानायगिरेरन्तभागस्थे महावाक्यनाम्नि शृङ्गे प्ररूढां ज्योतिर्मयीं ब्रह्मविद्यां नाम सिद्धाञ्जनौषधिमाहरामि, यया जीवराजस्यानर्थनिवृत्तिरानन्दावाप्तिश्च संपत्स्यते ।

उभौ—तथा । (इति परिक्रम्य निष्क्रान्तौ ।)

इति शुद्धविष्कम्भः ॥

(ततः प्रविशति यथानिर्दिष्टो बुद्धया सह जीवः ।)

जीवः—अहह महति क्वाप्यन्धकारे कठोरे विवशनिपतितोऽहं विह्वलः संभ्रमामि ।
अधिकमपि विपन्नो हन्त तापैरिदानीमनधिगतशरण्यः किं करोमि क्व यामि ॥

बुद्धिः—अज्जउत्त, किं अआणन्तो विअ तुमं परिदेविदम्मि मणं कुणसि । गच्छ दाव सरणं तहणिन्दुसेहरं जो उम्मत्थअकरुणदाए दीणाणाहविवण्णाणं सरणं सुणिज्जइ । [आर्यपुत्र, किम-

जानन्निव त्वं परिदेविते मनः कुरुषे । गच्छ तावच्छरणं तरुणेन्दुशेखरं य उन्मस्तककरुणतया दीनानाथविपन्नानां शरणं श्रूयते ।]

जीवः—देवि, सम्यगनुस्मारितोऽस्मि ।

मतं गतमितः प्रभृत्यहमहंकृतिं दुस्त्यजां विसृज्य सह लज्जया विधुतसर्वदुर्वासनः ।
हर स्मरहर प्रभो शिव भवेति जल्पन्विभोः सरोजसमरोचिषं चरणमेव संचिन्तये ॥ ६ ॥

(शिरस्यञ्जलिं बध्नन्)

जय जय देवदेव जगदीश नदीशशिभृद्घनघनसारसारसुकुमार कुमारगुरो ।
शिव शिवतातितातिरमणीयमणीवलयिन्भव भवभीमभीषथनोदन मोदयिता ॥ ७ ॥

जनजननावनावसितभूः सितभृतिरुचे रुचिरुचिराधराधरितपल्लव भिल्लवर ।
महिमहिमाग जागधसुरासुरसिद्धसुने हर हर खेऽघमेघमधुना मधुनामकथ ॥ ८ ॥

समसमभावि भाविभवभावन भावभुवा रणरणकेन केनचन भीमहता वहता ।
गलगलदश्रुदश्रुलभुजङ्गभुजाङ्गमदो परिरक्षिदेहि देहिसुखसाधक साधुकृपाम् ॥ ९ ॥

दधदधरस्य रस्यतमहासमहासुषुमामहमहमादिमादितिजवन्दित वन्दितगीः ।
विधुविधुताण्डताण्डवाचिदम्बर शम्बरजिद्वर धरणीमणीमयनिवेश निवेशय माम् ॥ १० ॥

कृतौ कृत्यो भृत्यो निगलभरनिस्पन्दित इव प्रभुं त्वां क्रोशामि स्मरमथन तन्मोचनकृते ।
अनुक्रोशात्किं न द्रवति हृदयं किंचिदपि ते यमासाद्योत्क्रोशो न किमधिगतः कर्णसरणिम् ॥

असंख्यैरुत्पादैरनियतमसंख्यैश्च निधनैस्तवाज्ञामेतावच्चिरमहमकार्षं कथमपि ।
इतः कर्तुं नालं भृशमलसतामप्युपगतः सुखं वर्तिष्ये मां कृपणमनुमन्यस्व कृपया ॥१२॥

इयं ते विज्ञप्तिः पुनरपि पुरारे पुनरपि प्रभुर्नाहं भूयो जनितुमथ मर्तुं च भुवने ।
तदेतस्मात्पाशाच्चिरदृढनिरूढात्पशुपते पशुं मामुन्मोच्य प्रदिश परमानन्दपदवीम् ॥ १३ ॥

बुद्धिः—(श्रुतिमभिनीय) कहं पडिसद्दो विअ । [कथं प्रतिशब्द इव ।]

जीवः—(आकर्ण्य) नूनं पान्थैर्भवितव्यम् । भवतु, उत्क्रोशामि । भो भोः पान्थाः, परित्रायध्वं, परित्रायध्वम् ।

स एष पाशबन्धेन दुर्मोचेनाभिपीडितः । विलुठामि तमिस्रान्धो जरामरणगह्वरे ॥ १४ ॥

(ततः प्रविशत्यनुग्रहः श्रवणशर्मा च ।)

अनुग्रहः—वत्स श्रवणशर्मन्, कथं नाम द्वैतवादस्त्वया निर्जितः ?

श्रवणशर्मा—भगवन्, श्रूयताम् । स खलु प्रथमं प्रपञ्चो मिथ्येति मम सिंहनादमाकर्ण्य तदसहमानः प्रत्यवातिष्ठत ; अचिक्षिपच्च युक्तिबाणम् ।

प्रपञ्चो मिथ्या चेत्कथमयमबाधः स्फुरति नो
न तुच्छस्य क्वापि स्फुरणमुपपन्नं त्रिभुवने ।
कथंचित्तुच्छोऽपि स्फुरति यदि तर्हि स्फुरतु नः
स्वयं वन्ध्यासूनुर्गगनकुसुमालंकृततनुः ॥ १५ ॥

इति । स च युक्तिबाणस्तत्क्षणमेव मत्प्रयुक्तेन पतियुक्तिबाणेन निवारितः ।

असावत्यन्तासन्न हि भवति वन्ध्यासुत इव प्रतीतिस्तेनास्य प्रसरणमुपैतुं प्रभवति ।
यदि ब्राह्मी विद्या निजमतिविकासं वितनुते तदा सर्वोऽप्येष प्रविशति समूलप्रविलयम् ॥

इति । अनन्तरं तेन, अस्तीति प्रविभाव्यमानमखिलैरर्थक्रियार्हं जग-
न्नास्तीति प्रतिपाद्यते कथमिदं नानाविधाकारवत् ।

इत्यस्त्रमुपन्यस्तम् । तच्च,

वाचा केवलमस्ति विश्वमिदमित्यारभ्यते विभ्रमा-
देतस्यैव महापराक्रमवशादर्थक्रियाऽनुक्रमः ॥ १७ ॥

इत्यस्त्रेण प्रत्यवारयम् । अस्त्रान्तरं च प्रायोजयम्,

चिज्ज्योतिरेव जगदात्मतया चकास्ति वस्त्वन्तरं किमपि नास्ति विचार्यमाणे ।
रज्जोर्भ्रमाधिकरणादपि रज्जुसर्पस्तत्त्वान्तरं भवितुमर्हति किं कथंचित् ॥ १८ ॥ इति ।

अनु०—ततः, ततः ।

श्रवणशर्मा—ततश्च तेन प्रकाशमानत्वहेतुकं विश्वसत्यत्वसाधकमनुमानास्त्रमुपक्षिप्तम् । मया तु,

विश्वं समस्तमपि विभ्रममात्रमेतदात्मैव सन्नयमनन्यसुखप्रकाशः ।
स्फूर्त्यैव विश्वमपि सत्यमितीष्यते चेत्को नाम शुक्तिरजतेन धनी न भावी ॥ १९ ॥

इत्यनेन प्रत्यक्षिपम् ।

अनु०—ततः, ततः ।

श्रवणशर्मा—तश्च तेन 'द्वासुपर्णा' इत्यादिभेदश्रुतिकदम्बको गृहीतः। मया च मयाऽन्यथयित्वा निगितनयधारेण तत्त्वमसिना प्रतिक्षिप्तः। प्रस्तश्च तेन द्वैतवादो लुप्तश्च।

अनु०—(सश्लाघं श्रवणशर्माणं परिष्वज्य) साधु वत्स, साधु। अतः परं हतप्राय एवाज्ञानवर्मा।

श्रवणशर्मा—भो भगवन्, आज्ञाप्यतामेष दासः स्वस्यापि दुरात्मनो निर्बर्हणाय।

अनु०—वत्स, सखा मे शिवप्रसाद एव ब्रह्मविद्यासमेधितेन ब्रह्मास्त्रेण तं भस्मीकरिष्यति। त्वमपि तस्य साहाय्यके वर्तस्व।

श्रवणशर्मा—तथा (इति निष्क्रान्तः।)

अनु०—क्व पुनरिदानीं जीवराजो यमुद्धरिष्यामि। (इति परिक्रामति।)

जीवः—भो भोः पान्थाः, परित्रायध्वं परित्रायध्वम्।

अनु०—(आकर्ण्य) कथमत्रैव जीवराजः। (इत्युपसर्पति)

जीवः—(चक्षुषी उन्मील्य) हन्त प्रभातमिव।

आकीर्यन्ते कतिचिदधुना भास्वता स्वस्य भासो
निर्मुच्यन्ते दिशि दिशि तमःश्रेणयश्च द्रढिम्नः।
आकाशोऽस्मावपि च दहरः पुण्डरीकान्तरस्थो
विष्वग्व्याप्तिं व्रजति शनकैर्विश्रुतेर्बोधयोगात्॥ ६०॥

(सदृष्टिक्षेपम्) क एष काषायधरो मत्करी गगनतलादवतीर्णो रविबिम्ब इवेत एवाभिवर्तते। यस्य गात्रप्रभाभिर्निस्तमस्कितं भुवनतलम्। भवतु एनं शरणयामि। भो भो भगवन् शरणं शरणम्।

अनु०—भद्रमुख, कस्त्वमसि?

जीवः—यः कश्चित्सर्वथा तावन्मुमुक्षुरस्मि।

अनु०—किमात्मानं न जानासि?

जीवः—जानामि तावद्बद्धोऽस्म्येषः, यं जीवराजमामनन्ति।

अनु०—हन्त, कथं बद्धोऽसि? किं पुनर्मया साधनीयम्?

जीवः—बद्धतव्यस्तावदहमस्मादापदर्णवान्नत्रभवता।

अनु०—हन्त, युगपदनेकं कर्तव्यमापतितम्। अद्य हि,

मज्जन्त्यमी परुमरीचिमहासमुद्रे मूर्च्छन्ति केचिदिह रज्जुभुजङ्गदष्टाः ।
अन्ये पुनः शशविषाणविपाटिताङ्गा बद्धो ऽवांश्च कथमत्र समुद्धरामः । २१

जीवः—अहो विडम्बना ।

क्व वा पारावारो जनयति मृगतृष्णाजलमयः
क्व रज्ज्वां सर्पो वा क्व नु शशविषाणादिकमपि ।

अनु०—

तथा कीदृक्पाशः कथय ननु बन्धः क इव
ते निवृत्तिर्वा कीदृक्त्व इव वीक्षस्व निपुणम् । २२ ॥

जीवः—कथमसत्यो मे बन्धः ?

अनु०—राजन्, शृणु । ते तत्त्वमुपदिशामि ।

त्वं ब्रह्मासि स्वरसमुखसद्बोधरूपं यदेतज्ञाना-
भूतस्वार्थाय परिणतो नामरूपप्रपञ्चः ।
मिथ्यैवायं त्वदुपहितया मायया कल्पितत्वा-
त्सत्यत्वस्य त्विह न घटते गन्धतोऽपि प्रसङ्गः । २३ ॥

जीवः—(सहर्षाश्चर्यम्) हन्त कथमहं ब्रह्मैव । जीव इति खल्वेतावन्तमनेहसमात्मानं प्रतीतवानस्मि ।

अनु०—राजन्, राजकुमारस्य व्याधभाव इव ब्रह्मण एव सतस्तव भ्रमकल्पितो जीवभावो न परमार्थः । तथा हि,

उन्मादेन वनं गतो नृपसुतो विस्मृत्य राजात्मतां
व्याधोऽस्मीह महमित्यमन्यत चिरं व्याधालये संवसन् ।
राजैव त्वमिति प्रबोधनपरैराप्तोपदेशैरथ
व्याधत्वं भ्रमकल्पितं परिजहद्राजैव सद्योऽजनि ॥ २४ ॥

एवं च,

आत्मैव मंस्त्वमपि विभ्रमतोऽसि जीवो येनाभिभूयसि जगन्मयमिन्द्रजालम् ।
जानीहि तन्नतु जहीहि च जीवभावं ब्रह्मात्मना भव परं परिशिष्यमाणः ॥ २५ ॥

जीवः—(आत्मानं निपुणं निर्वर्ण्य सानन्दम्) हन्त, मुक्तोऽस्मि पाशबन्धाद्भगवदनुग्रहेण ।

अनु०—राजन्, कथं मुक्तमात्मानं कथयसि। बद्धः खलु मुच्यते लोके न केवलः। तव च

कूटस्थनित्यसुखबोधतनोः प्रतीचो बन्धो विमोचनमिति भ्रमदुर्विलासः।
वन्ध्यासुतस्य वपुरादिगुणप्रपञ्चस्तत्पञ्चता च सुतरां परिकल्पनैव ॥ २६ ॥

जीवः—हन्त, सुविदितं मे ब्रह्म।

अनु०—यदि मन्यसे सुविदितं ब्रह्मेति, तर्ह्यविदितमेव तत्, यतस्तन्निरस्ताशेषविशेषतया विदिक्रियाया अपि नार्हत्येव कर्मभावमनुभवितुम्।

जीवः—

न बद्धो नापि मुक्तोऽहं परमार्थनिरूपणे। मोहाद्बद्ध इवाभूवं बोधान्मुक्त इवाऽधुना ॥
भगवन्, त्वं हि मे पिता, यो मे तमसः पारं दर्शितवान्। (इत्यनुग्रहस्य पादयोः पतति।)

अनु०—राजन्, अचिरादाप्नुहि जीवन्मुक्तिकरग्रहणकल्याणम्। त्वदनुकम्पनायैव प्रेषितोऽहमनुग्रहनामा श्रीदेशिकचरणैः।

जीवः—एष संप्रति कृतार्थोऽस्मि सुगृहीतनाम्नो भगवतोऽवलम्बनेन। अद्य हि,

स्वस्थे मयि स्वरसस्वसुखावबोधे व्यामोहतो जगदिति व्यपदिश्यते यत्।
अन्यत्र कुत्रचिददृष्टमरूपरूपमस्थानचित्रमिति निश्चिनुमस्तदेतत् ॥ २८ ॥

अपि च,

मिथ्या समुल्लसतु नाम जगद्विचित्रमेतावताऽपि मम तत्त्वविदो न हानिः।
स्वप्ने भयंकरगजादिनिरीक्षणेऽपि न स्वाप्निकत्वमनुमंदधतोऽस्ति भीतिः ॥ २९ ॥

अपि च,

कर्तेति कायिकविचेष्टितदर्शिनो मां गृह्णन्ति चेत्किमियतैव तथा भवामि।
पारिप्लवोऽयमिति पामरधीगृहीतश्चन्द्रस्तथा न हि चलाम्बुदसंनिकृष्टः ॥ ३० ॥

अपि च,

अद्यास्तमेतु वपुराशशितारमास्तां कस्तावताऽपि मम चिद्वपुषो विशेषः।
कुम्भे विनश्यति चिरं समवस्थिते वा कुम्भाम्बरस्य न हि कोऽपि विशेषलेशः ॥

किं बहुना,

आभासमात्रतनवो जगतीविकल्पा मां न स्पृशन्त्यपि निरस्तसमस्तसङ्गम्।
आरोपिता मलिनतादिविचित्रधर्मा लिम्पन्ति किं नु विमलं वियदन्तरालम् ॥ ३२ ॥

अनु०—एतावदेव खल्वमृतत्वम्।

जीवः—(सदृष्टिक्षेपम्) भगवन्, क एष पुरुषो ज्योतिर्लताहस्त इत एवाभिवर्तते ?

अनु०—एष सखा मे शिवप्रसादो ब्रह्मविद्याऽऽख्या सिद्धाञ्जनौषधिं तवोपहरति ।

जीवः—(साक्षात्कुर्वन्।)

अनन्तकोटिमार्तण्डमण्डलाखण्डिताकृति । किमेतज्ज्योतिषां ज्योतिराक्रामति जगत्त्रयम् ॥

अनु०—

धाराभुजङ्गधरणीविवरादिरूपां भ्रान्त्युत्थितां परिणतिं रशनेति धीवत् ।
आविद्यकं द्रुमरुदादिविकारमात्ममात्कुर्वती परिचकास्ति चिदद्वितीया ॥ ३४ ॥

जीवः—आश्चर्यम्, आश्चर्यम् ।

सूर्योऽप्यत्र न भासते दशशतैरावार्यमाणः करै-
श्चन्द्रस्येह कथाऽपि का जडमयीं मूर्तिं निजां बिभ्रतः ।
ताराणां तडितां ततिर्नभसि खद्योताकृतिः कुत्र वा
सज्वालोऽपि कुतोऽयमग्निररसप्रायेन्धनालम्बनः ॥ ३५ ॥

अपि च,

जडताशरणं समस्तमेतज्जगदानागहिरण्यगर्भलोकम् ।
अनुभात्यमुमेव भान्तमन्तर्यमयन्तं स्वत एव चित्प्रकाशम् ॥ ३६ ॥

अनु०—इदमेव ते पारमार्थिकं रूपम्, यदनवबोधेन चिरमनुभूतवानसि संसारसंकटम् ।

जीवः—एष धन्योऽस्मि धन्योऽस्मि धन्योऽस्मि धरणीतले ।
यतः साक्षात्स्वयं ब्रह्मास्म्यहं ब्रह्माद्यगोचरः ॥ ३७ ॥

अपि च,

इह जनुष्यथ पूर्वजनिष्वपि भ्रमकृतश्रुतिकिंकरताजुषा ।
बत मया समयानुपरोधिना कियदमुष्य कृते सुकृतं कृतम् ॥ ३८ ॥

(आनन्दातिशयेन स्तम्भं नाटयन्स्थितः ।)

(ततः प्रविशति शिवप्रसादः ।)

शिवप्रसादः—धन्यो जीववसुन्धरापरिवृढः पुण्यैः पुरोपार्जितै-
र्ब्रह्माद्वैतमहाध्वसंस्तवमनुप्राप्तः शमादिक्रमात् ।
मीमांसाश्रवणान्वयेन च परिज्ञातात्मतत्त्वः स्वयं
साक्षात्कारमयीं करेऽद्य कुरुते श्रीब्रह्मविद्यामपि ॥ ३९ ॥

अथ वा,

एतस्येयं करमनुविशेद्ब्रह्मविद्येति नैतांचित्ते
धत्ते मम कुतुकितां विस्मयं वा स्मयं वा ।
येन स्वैरं निरवधिपरानन्दकन्दायमाना
जीवन्मुक्तिः करतलगता साऽपि सद्यो भवित्री ॥ ४०

अनु०—राजन्, एष महात्मा प्रत्युद्गमनेन संभावनीयः ।

जीवः—(तथा कृत्वा)

ओं नमस्ते प्रशस्ताय संसारध्वान्तभानवे । परमानन्दकन्दाय प्रणवार्थप्रदर्शिने ॥४१॥

(इति शिवप्रसादं प्रणमति ।)

शिव०—

भो राजन्ब्रह्मविद्येति ख्याता सिद्धाञ्जनौषधिः ।
गृह्यतामियमाशीर्भिः सहैव शिवशासनात् ॥ ४२ ॥

(इति ब्रह्मविद्यामुपहरति । जीवः सविनयं नाट्येनाभिनयाय बुद्ध्या संयोजयति ।)

बुद्धिः—(हर्षपारवश्येन संस्कृतमाश्रित्य)

अद्भुतेयमखण्डेयमात्रानन्दशेवधिः । ममैवैषा परिणतिर्महाप्रणयसंपदः ॥ ४३ ॥

जीवः—शृणु देवि,

अङ्गैरङ्गविमिश्रणादभिनवोद्रेकप्रकारोदय-
प्रावण्यैकशरण्यपुण्यमहसोर्भेदुषोरेकताम् ।
त्वद्ब्राह्मौषधिगात्रयोः सहजतासंपत्तियोगादिव
प्रेमाणं प्रतिजग्मुषोर्झटिति मे भेदभ्रथा लुप्यते ॥ ४४ ॥

(बुद्धिः ब्रह्मविद्यां जीवस्य कण्ठे समर्पयति)

जीवः—(सानन्दम्)

सिद्धाञ्जनौषधिरियं निहिताऽधिकण्ठमानन्दमेकमधिवाङ्मनसं तनोति ।
प्रायेण भाविनि समागमने शिवाया लीलावलाङ्कुलतया विनिवेशितेव ॥ ४५ ॥

हन्त, इदानीं स्वेन रूपेणाभिनिष्पद्य परं ज्योतिरुपसंपन्नोऽस्मि । तथा हि,

प्रकाशश्चाप्राप्यप्रकटनधुरीणौषधिबलादहं
साक्षाद्भूतोऽप्यधिकमपरोक्षः सगभवम् ।
इदानीमाश्चर्यं गगन इव गन्धर्वनगरं
समन्तादध्वस्तं मयि जगदशेषं विलसति ॥ ४६

अनु०—सखे शिवप्रसाद, किमासीदज्ञानवर्मा ।

शिव०—स किल,

क्षीणः शक्त्याऽऽवरणचणया ब्रह्मविद्याग्रहोभि-
र्दग्धो दग्धाम्बरमिव तनुच्छाययैवावशिष्टः ।
प्रारब्धस्य स्वयमथ वशे स्थ पितोऽयं मया
तज्जीवन्मुक्तेः परिणयविधौ नोऽपि नास्त्यन्तरायः ॥ ४७ ॥

जीवः—क्व पुनरिदानीं तत्रभवती ।

शिव०—

अस्मिन्ब्रह्मपुरे मनोहरतरं हृत्पुण्डरीकाभिधं
वेश्म स्वस्त्ययनं समस्ति रजसा शून्यं विशुद्धं च यत् ।
तस्यान्तर्महदङ्गणं दहरमित्याख्यायते यद्बुधै-
र्जीवन्मुक्तिरिहैव तिष्ठति भवान्यस्तौतु पाणिग्रहम् ॥ ४८ ॥

जीवः—कथमत्रैव संनिहिता तत्रभवती । गुहायां व्योम्नि प्रतिष्ठितति खलु सा श्रूयते ।

शिव०—

हृत्पुण्डरीकमेवेदं गुहाशब्देन गीयते । व्योमेति दहराकाशं तदन्तर्वर्ति कीर्त्यते ॥ ४९ ॥

तद्विवाहाङ्गणमेव प्रविशामः ।

(तथेति परिक्रम्य सर्वे दहराङ्गणप्रवेशं नाटयन्ति)

शिव०—

स एष दहराकाशो भूताकाशकृतोपमः । द्यावापृथिव्याद्यखिलं यस्यान्तः सुसमाहितम् ॥

इयं चात्र जीवन्मुक्तिर्विवाहोचितवेषा सख्या भवितव्यतया सह संलपन्ती वर्तते ।

जीवः—(निरूप्य सपरितोषम्)

यत्पारे मनसो गिरामपि गुणा यस्मिन्नलभ्योदया
रूपं यस्य च दुर्निरूपमखिलैर्यच्च स्वतः सुन्दरम् ।

यल्लब्ध्वा कृतिनस्तनोऽपि न परं लब्धव्यमाशामते
यत्प्रेमास्पदमद्भुतं च तदिदं साक्षात्कृतं नः सुखम् ॥ ५१ ॥

देवि, त्यज्यतां बहिर्व्यासङ्गः ।

स्वप्नारामविरामसीमनि पुरा निःसीमकामोद्यमा
या मे कामपि निर्वृतिं व्यतनुत प्रत्यस्तबाह्यान्तराम् ।
सैषा मे वरवर्णिनी समदशाविद्योतिविद्युल्लता-
रेखासंशयदायिकायनियतच्छाया दरीदृश्यते ॥ ५२ ॥

(ततः प्रविशति जीवन्मुक्तिः भवितव्यता च ।)

जीवन्मुक्तिः—हला भवितव्वदे, अवि सच्चं दे वअणं ? [हला भवितव्यते, अपि सत्यं ते वचनम् ?]

भवितव्यता—कहं अण्णहा कहइस्सं । सच्चं एव्व सो जीवराओ तुज्झ विरहेण महन्तं अणत्थं अणुहोदि । जदवत्थं तं दट्ठूण परिच्चत्तमच्छरा देवी सअं एव्व दुवेण तुम्हाणं संघडणे पउत्ता उवट्ठिदं वि अप्पणो तादस्स अ विणासं ण लक्खेदि । [कथमन्यथा कथयिष्यामि । सत्यमेव स जीवराजस्तव विरहेण महान्तमनर्थमनुभवति । यदवस्थं तं दृष्ट्वा परित्यक्तमत्सरा देवी स्वयमेव द्वयोर्युवयोः संघटने प्रवृत्तोपस्थितमप्यात्मनस्तातस्य च विनाशं न लक्षयति ।]

जीवन्मुक्तिः—कहं वावादिओ सो अण्णाणवम्मा ? [कथं व्यापादितः सोऽज्ञानवर्मा ?]

भवितव्यता—किं इदो वि सन्देहो । पेक्ख दाव तस्स विलासो पुढमं विअ ण दिस्सइ । [किमितोऽपि संदेहः । पश्य तावत्तस्य विलासः प्रथममिव न दृश्यते ।]

जीवन्मुक्तिः—जदि एव्वं सोहणं होदि । [यद्येवं, शोभनं भवति ।]

भवितव्यता—(निरूप्य) हला जीवम्मुत्ती, कहिं पेक्खसि । इदो आअदो एव्व सपरिवारो जीवराओ देवी अ । [हला जीवन्मुक्ते कुत्र पश्यसि । इत आगत एव सपरिवारो जीवराजो देवी च ।

(जीवन्मुक्तिः ससंभ्रमं स्थिता ।)

भवितव्यता—एहि देवि, एसा णो पिअसही इदो एव्व वट्टइ जा अप्पणो वि अहिअअरं तुह पेमहाअणं । [एहि देवि, एषा नः प्रियसखीत एव वर्तते याऽऽत्मनोऽप्यधिकतरं तव प्रेमभाजनम् ।]

(बुद्धिरुपसृत्य जीवन्मुक्तिं परिष्वजते ।)

जीवन्मुक्तिः—(परिष्वज्य) दिट्ठिआ खु दाणिं सङ्गदम्हि सहीए । [दिष्ट्या खल्विदानीं संगताऽस्मि सख्या ।]

बुद्धिः—एव्वं एव्व अम्हाणं अज्जउत्तेण वि सङ्गदा होहि । [एवमेवास्माकमार्यपुत्रेणापि संगता भव ।]

जीवन्मुक्तिः—(स्वगतम्) कहं एसा अम्हाणं त्ति मन्तेदि । [कथमेषाऽस्माकमिति मन्त्रयते ।]

(इति लज्जानतमुखी तिष्ठति ।)

प्रसादानुग्रहौ—

देव श्रेयान्मुहूर्तोऽयमनुजानीमहे वयम् ।
अयोनिजायाः कन्यायाः पाणिं गृह्णीष्व पाणिना ॥ ५३ ॥

जीवः—(सपरितोषम्) तथा । (इत्युपसृत्य)

अयि विलासिनि वासगृहेऽपि ते नवरसादतिसाहसमागतः ।
अयमसौ समसौख्यसमुत्सुको मयि दयस्व तव स्वमहं यतः ॥ ५४ ॥

(इति जीवन्मुक्तिं करे गृह्णाति ।)

(जीवन्मुक्तिः शृङ्गारलज्जामभिनयति । आकाशे सुमनोवृष्टिः । नेपथ्ये वाद्यघोषः । सर्वे चाशिषः प्रयुञ्जते ।)

जीवः—(स्पर्शसुखमभिनीय)

स्पर्शेन ते परमसुन्दरि दुर्निरूपं निर्वाणमुन्मिषति मे दुरवापमन्यैः ।
सद्यः प्रसीदति गणश्च ममेन्द्रियाणां चैतन्यमुल्लसति शाम्यति कामरोगः ॥ ५५ ॥

बुद्धिः—हला भविदव्वदे, सम्पदं सिथिलिआहिआरम्हि संवुत्ता । ता अदिदिग्घं णिद्दं आसादिअ विस्समसुहं अणुहोम्मि । [हला भवितव्यते, सांप्रतं शिथिलिताधिकाराऽस्मि संवृत्ता । तदतिदीर्घां निद्रामासाद्य विश्रमसुखमनुभवामि ।] (इति गन्तुमिच्छति ।)

भवितव्यता—हला देवि, मं उज्झिअ दाणिं एव्व कहिं णिवट्टेसि । चिट्ठ दाव खणमेत्तं । दुवे वि अम्हे समं एव्व णिव्वट्टम्हो । [हला देवि, मामुज्झित्वेदानीमेव कथं निवर्तसे । तिष्ठ तावत्क्षणमात्रम् । द्वे अप्यावां सममेव निवर्तिष्यावहे ।]

जीवः—

सा त्वं देवि ब्रह्मविद्या च सेयं सैषा जीवन्मुक्तिरद्योपपन्ना ।
यद्वा किंचिद्दृश्यमध्यासिद्धं तन्मे सर्वं नात्मनोऽन्यद्विभाति ॥ ५६ ॥

प्रसादानुग्रहौ—राजन्, प्राप्तोऽसि स्वपदम्, आप्तकामः कृतकृत्यश्च । किं ते भूयः प्रियमुपहरावः ।

जीवः—


अथाप्यात्मरतिक्रीडामिथुनानन्दलक्षणान् । व्यवहारान्यथारब्धमाचरिष्याम्यतः परम् ॥
तथापीदमस्तु भरतवाक्यम्—

आ सुप्तेराऽऽयुरन्तादवहितमनसः साधवो बुद्धतत्त्वा
वेदान्तोदाहृतार्थप्रचयपरिचयैरेव कालं नयन्तः ।
प्रत्यग्ब्रह्मैक्यसाक्षात्कृतिमतिविशदामन्तरासेदिवांसो
विद्वांसो धूतदृश्यव्यसनविततयो भूरि विश्वं पुनन्तु ॥ ५८ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ।

इति श्रीकौशिककुलजलधिचन्द्र श्रीबालचन्द्रमखीन्द्रतनूभवनल्लाध्वरिविरचितं
जीवन्मुक्तिकल्याणं नाम नाटकं संपूर्णम् ॥



श्रीः

॥ श्लोकानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्		पृष्ठम्
अकृत्रिम०	१३	आभासमात्र०	५२	कविरतिमनोज्ञ०	३
अक्षैरक्ष०	५४	आम्नायस्य गिरेरन्ते क्वचित्	१५	कामादयः सन्तु	७
अणुआ सत्त०	२४	आम्नायस्य गिरेरन्ते सेयं	१९	कासारान्तर०	९
अथ प्यात्म०	५८	आरभ्योर्वी०	२५	कुटजवकुल०	११
अद्भुतेयमखं०	५४	आरामेव	१२	कूटस्थनित्य०	५२
अद्य तावदियं	२३	आलोक्य	२७	कृच्छ्रेण क्षण०	३१
अद्यास्तमेतु	५२	आसिक्ता	३०	कृतौ कृत्यो	४८
अधीतस्था०	३१	आसुतेरा०	५८	क्वचित्प्रतिरुद्धा०	११
अनन्तकोटिः	५३	आस्तां तावः	२५	क्व वा पाग०	५१
अनुकलमपि	३७	इज्यादान०	३१	गत गतमितः	४८
अनेनैवानु०	३	इन्द्रियहयं	९	गत्वा चन्द्र०	५
अन्यस्मादपि	२५	इयं ते विज्ञप्ति०	४८	गन्तुं तत्पद०	४०
अन्योन्यात्मक०	४३	इयं या कल्याणी	१३	गुहायां निहिता	२५
अप्राकृताकार०	११	इह जन्तुष्वथ	५३	ग्रामाराम०	२५
अभेद गतयो०	१०	उच्चैरुच्चरतः	१७	चत्वारिंशत्म०	३३
अयं गलाक्षः	८	उत्क्षिप्ताऽसि	३५	चिज्ज्योतिरेव	४९
अयि विज्ञानिनि	५७	उद्गायन्ति	३०	चिरादेतावन्तं	८
अल्पायुर्विगो	४६	उद्बोधितोऽपि	४५	चिराय सोऽयं	७
अवहेलोत्पा०	४८	उन्मीलन वनं	५१	चोदनात्मा	३
अविचलयना०	४५	उपक्रमोपसं०	१२	छायैषा पुनः	४
अस्तं गच्छति	४५	उपर्युपरि	१२	जडताशरणं	५१
अस्तीति प्रति०	४५	एकाद्वित्रि	१४	जनजननावना०	४८
अस्मिन्ब्रह्म०	५५	एकामजां	२	जय जय देव	४८
अहं ब्रह्म	८	एकैकोऽप्यल०	२७	ततः स्वप्ना०	१५
अहह महति	४७	एतस्यामभि०	४४	तदेवेदं तस्या	१९
अहो मन	२७	एतस्येयं	५४	तातस्याध्य०	१४
आकीर्यन्ते	५०	एष धन्योऽस्मि	५३	तादात्म्येन	१
आकृष्य	३३	एषोऽस्मि	२७	तावत्स्मृति०	१०
आचारेऽभ्युदयं	२५	एह्येहि	२१	त्व देवान्न	४४
आचार्योपास्ति०	३७	ऐन्द्रं यत्पद०	३२	त्वं ब्रह्मासि	५१
आचूडात्त०	१८	ओं नमस्ते	५४	त्वं भूषणं त्व०	२३
आत्मस्वामिन०	७	करम्बयति	१३	त्वमसि जगतां	३४
आत्मोद्देश०	४६	कर्तेति कायिक०	५२	त्वमहमयमहं	२१
आत्मैव संस्त्व०	५१	कर्म कष्टमिति	२६	दधदधरस्य	४८
आपन्मत्सरि०	३१	कर्माणि स्वय०	२६	दधि मधुरं	१६

	पृष्ठम्		पृष्ठम्		पृष्ठम्
दार्णि पडिप्पहादं	२	बालातपश्च०	१२	नारदानुग्रह०	२
दीर्घा प्रदीप०	९	बुद्धित्यागेन	६	शुकैकैकि०	१२
दुःखं नाम	३१	भद्राकार०	१	श्रवणरसन०	८
दृशा लीढा	१७	भुक्ता भोगाः	४२	श्रीविष्णुः	१३
दृष्टा सा वर०	१६	भूयोभिर्भि०	३१	श्रोतव्यं श्रुति०	४१
देव श्रेयान्सु०	५७	भेददृष्टिभव०	४१	स एष दहरा०	५५
देवोऽयं स्वपदा०	६	भो राजन्ब्रह्म०	५४	स एष पाश०	४८
देवो वा दनु०	३०	मज्जन्त्यमी	५१	स एष मधुरः	७
धनदाना०	२७	मरकतमणि०	११	संध्यास्नान	२५
धन्यो जीव०	५३	मांसानां पालि०	३२	संसाराध्वनि	५
धारासुजङ्घ०	५३	मिथ्या समु०	५२	संसारोऽयमना०	४३
धावन्तो वि०	७	मीनस्त्रीव	१८	सखा वा बन्धु०	२७
ध्यायंस्ताम०	३७	मुग्धा तव	३०	स बद्धो	४६
ध्यायतीव	१०	मुग्धे देवि	१०	समस्तमभावि	४८
न कर्तव्यं	३६	मोहो मत्त०	२७	समूहो धूमाना०	२७
न बद्धो नापि	५२	मोहो मोह०	३१	सर्वः कर्मजितो	४१
नारीवङ्गने	२६	यत्पारे मनसो	५	सर्वे वेदा	३९
नालापेऽभि०	३८	यत्र द्वितै०	२१	सस्नेहं चार०	१६
निःशङ्कं मधु	३३	यद्या ना तन्व०	३८	सा त्वं देवि	१८
नित्यानित्व०	३५	यदि नाम कुतं	१९	सिद्धाञ्जनौषधि०	५३
निरुपधि पर०	३४	यद्भाव	२१	सूर्योऽप्यत्र	५३
नीरन्ध्रं	३०	यमाक्रष्टु	३२	सैषा वधूरिह	१८
नीरक्षीरवदा०	१०	यस्या दर्शनमेव	१९	सोऽयं न	४
नैषा दृष्टचरी	१८	यामप्राप्य	४०	स्पर्शेन ते	५७
नैषा लभ्या	४०	यामासाद्य	४०	स्मरणमरणि०	५५
नौस्तम्भाग्र०	४७	यावन्मांस०	३२	स्वप्नारामवि०	५६
पराक्रान्तंम०	३२	योगारूढोऽपि	२८	स्वप्नारामस्य	११
परुषगरिकगे०	४५	रथ्याना जनु०	९	स्वयमखिल०	४३
पादौ पद्मभुवः	१३	रागद्वेष०	५	स्वयमयमुप०	२८
प्रकाशस्वाभा०	५५	राजाऽह	३०	स्वर्गादि०	३
प्रक्रान्तान्यरु०	२६	विकारगोचरै०	१८	स्वर्गो मयि	५२
प्रपञ्चो मिथ्या	४९	विनोदन	१७	हरिष्यामीति०	१२
प्रमातृत्वावेशो	९	विधिगोचर०	३	हितमन्यहिते	४४
प्रागन्तर्निहित०	१९	विश्वं सगस्तमपि	४९	हृत्पुण्डरीक०	५५
प्राणान्पञ्च	३७	विक्षेपादृते०	६	क्षीणाः शक्त्या	१५